श्रीमहाकविकालिदासप्रणीतम्

कुमारसम्भवम्

द्वितीयसर्गः

परीक्षोपयोगिसारसञ्चिका

पदच्छेद–अन्वयक्रम–प्रतिपदार्थ–भाव–विशेषांशैः

एवं विविधव्यासप्रश्नोत्तर–सन्दर्भवाक्य–ऐच्छिकप्रश्नोत्तरैश्च विभूषिता

सारसञ्चिकाकारः

डा. पठान् वलि साहेब्

एम्.ए., एम्.फिल्., विद्यावारिधिः (संस्कृतसाहित्ये)

अतिथि–अध्यापकः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति

प्रकाशकः

श्रीवनमालीप्रकाशनम्

तिरुपति – ५१७ ५०१

आन्ध्रप्रदेशः

२०१७

श्रीमहाकविकालिदासप्रणीतं **कुमारसम्भवम् – द्वितीयसर्गः**

परीक्षोपयोगिसारसञ्चिका

पदच्छेद–अन्वयक्रम–प्रतिपदार्थ–भाव–विशेषांशैः
एवं विविधव्यासप्रश्नोत्तर–सन्दर्भवाक्य–ऐच्छिकप्रश्नोत्तरैश्च विभूषिता

सारसञ्चिकाकारः : **डा. पठान् वलि साहेब्**
अतिथि–अध्यापकः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति

प्रथममुद्रणम् : २०११, प्रतिलिपयः : २५०, मूल्यम् – रू. १००/–

द्वितीयमुद्रणम् : २०१७ क्रीस्तोःपरम्।

प्रतिलिपयः : २५०,

मूल्यम् : रू. १२०/–

ISBN : 978-93-5281-301-8

Barcode :

प्रकाशकः : **श्रीवनमालीप्रकाशनम्**
तिरुपति – ५१७ ५०१, आन्ध्रप्रदेशः।

प्राप्तिसङ्केतः : डा. पठान् महम्मद् वलि खान्
गृहसङ्ख्या – ४–४–५४२, रामकृष्णडीलक्स् समीपे,
नेहूनगर्, तिरुपति – ५१७ ५०७, आन्ध्रप्रदेशः।
दूरवाणी – ८८८५१६१८५०
Email: mahammadvalipathan@gmail.com

टङ्ककः : **पठान् महम्मद् वलि,** वैदनग्रामः, बल्लिकुरवमण्डलम्,
प्रकाशम् जिल्ला, आन्ध्रप्रदेशः ५२३ ३०३

मुद्रणम् : प्रजाशक्तिदैनिकमुद्रणालयः, रेणिगुण्टरोड्, तिरुपति। दूरवाणी – 0877-2271997, 1998

Śrīmahākavikālidāsapraṇītam

KUMĀRASAMBHAVAM

DVITĪYASARGAḤ

Parīkṣopayogi Sārasañcikā

Padaccheda-Anvayakrama-Pratipadārtha-Bhāva-Viśeṣāṃśaiḥ
Evaṃ Vividhavyāsapraśnottara-Sandarbhavākya-
Aicchikapraśnottaraiśca Vibhūṣitā

Material Writer

Dr. Patan Vali Saheb

Guest Lecturer
Modern Courses, S.V. Vedic University, Tirupati

Publisher

SRI VANAMALI PUBLICATIONS

TIRUPATI - 517 501

Andhra Pradesh

2017

Śrīmahākavikālidāsapraṇītam **Kumārasambhavam Dvitīyasargaḥ**

PARĪKṢOPAYOGI-SĀRASAÑCIKĀ

Padaccheda-Anvayakrama-Pratipadārtha-Bhāva-Viśeṣāṃśaiḥ

Evaṃ Vividhavyāsapraśnottara-Sandarbhavākya-Aicchikapraśnottaraiśca Vibhūṣitā

Material Writer : **Dr. Patan Vali Saheb**
Guest Lecturer
Modern Courses, S.V. Vedic University, Tirupati
Phone : 88851 61850

First Impression : 2011, Copies : 250

Second Edition : 2017

Copies : 500

Prise : Rs.120/-

ISBN : 978-93-5281-301-8

Barcode :

Published by : **Sri Vanamali Publications**
Nehru Nagar, Tirupati - 517 501 A.P.

Available Address : **Pathan Mahammad Vali Khan**
Door No. 4-4-542/H4,
Near Ramakrishna Delux Circle,
Nehru Nagar, Tirupati - 517 501 A.P.
Email: mahammadvalipathan@gmail.com

DTP & Page Setting :
Pathan Mahammad Vali, Vaidana Post, Ballikurava Mandal,
Prakasam District, Pin - 523303

Printed at : Praja Sakti Daily Printing Press, Tirupati. PH: 0877-2271997, 1998

प्रास्ताविकम्

इह खलु सकलव्यवहारनिर्वहणाय भाषा एकैव प्रधानं भजते। तत्र च अमरवाणी अत्यन्तप्राचीना सुसंस्कृता च सती संस्कारयुक्तान् करोति। संस्कृतभाषायां सम्भाषणम् अमृतास्वादोपममस्ति। सा च संस्कृतवाङ्मयम् अपारं सत् अलौकिक-लौकिकादिभेदेन बहुविधम्। तत्र महाकाव्येषु कालिदासकृतं **कुमारसम्भवम्** अन्यतमं विद्यते।

यद्यपि कुमारसम्भवमहाकाव्यस्य षट्त्रिंशदधिकानि (३६) व्याख्यानानि उपलभ्यन्ते तथापि विश्वविद्यालयस्तरीयपरीक्षालेखार्थिनां छात्राणां कृते उपयुक्तप्रश्नोत्तर-सन्दर्भवाक्य-ऐच्छिकप्रश्नोत्तरैः विभूषितस्य ग्रन्थस्य अन्यत्र कुत्रापि अलाभात् विविधव्याख्यानां साहाय्येन एतत् सारसञ्चिकायाः निर्माणं विहितम्।

छात्रैकलाभदृष्ट्या विरचितायामस्यां सारसञ्चिकायां प्रत्येकस्य श्लोकस्य पदच्छेदः, अन्वयक्रमः, प्रतिपदार्थाः, भावः, विशेषांशाश्च सङ्कलय्य प्रदत्ताः सन्ति। एकैकस्य श्लोकस्य कृते एकं पुटं सीमितं वर्तते। यतो हि एकस्मिन्नेव पुटे तत्तच्छ्लोकस्य तत्तद्विशेषांशाः अवस्थितेष्वेव श्लोकस्य भावः सम्यगधिगन्तुं पारयन्ति छात्राः जिज्ञासवो वा इति धिया संस्थापितम्।

एतादृशग्रन्थनिर्माणे प्रेरणादातृभ्यः, यू.जि.सि.पुनर्बलनकक्ष्यासु (in U.G.C. Remedial Coaching Centre) पौनःपुण्येन मह्यं पाठनावकाशं कल्पितवद्भ्यः छात्रवत्सलेभ्यः **आचार्य गुळ्ळपल्लि श्रीरामकृष्णमूर्तिमहाभागेभ्यः** हार्दिकान् धन्यवादान् प्रकटयामि।

परिशीलितग्रन्थाः अनेकाः सन्त्यपि प्रधानतया **१.** कृष्णदासाकादमी द्वारा प्रकाशितं डा. सुधाकरमालवीयमहोदयैः सम्पाद्य, व्याख्यातं **सञ्जीविनी संस्कृत-सरलाहिन्दी-व्याख्यया** विभूषितम्, कुमारसम्भवं महाकाव्यम् एवं **२.** श्रीमुखशाण्डित्यगोत्रोत्पन्नत्रिपाठ्युपाह्व पं. श्रीकृष्णमणि-शास्त्रिमहोदयैः रचितं **विमला**व्याख्यासहितं कुमारसम्भवं महाकाव्यम् च अन्तयन्तमुपकृते। कथमिति चेत् कदाचित् सरलाहिन्दीव्याख्यायाः अनुवादः कृतः। कदाचिच्च विमलाव्याख्यायाः तात्पर्यार्थो गृहीतः। अतः ताभ्यम् व्याख्यातृभ्यां हार्दिकधन्यवादकुसुमान् समर्पयामि।

प्राथमिकविद्यानन्तरं संस्कृतकलाशालायां प्रवेशात्प्रभृति मामत्यन्तादरेण पुत्रवात्सल्येन च संस्कृतवाङ्मयसूक्ष्मांशान् उपदिश्य मामनुग्रहपात्रं कृतवद्भ्यः श्रीकाञ्चीकामकोटिपीठाधिपतिभिः ***अद्वैतवेदान्तरत्न*** इति बिरुदाञ्चितेन सम्मानितेभ्यः **डा. श्रिष्टि लक्ष्मीकुमारशर्ममहाशयेभ्यः,** तेषां धर्मपत्नीभ्यः **शर्वाणीमहाभागाभ्यः** च नूनमयमधमर्णः।

एतस्यां सारसञ्चिकायां निर्माणे परिष्करणे च अत्यन्तमुपकृतवद्भ्यः सदा प्रेरणादानेन उत्साहितेभ्यः मन्मार्गदर्शकेभ्यः मच्छ्रेयोऽभिलाषिभ्यश्च **डा. के. राजगोपालन् महोदयेभ्यः** कार्तज्ञ्यमाविष्करोमि।

अस्याः सञ्चिकायाः परिष्करणे यदा तदा वा आवश्यकं साहाय्यं कृतवद्भ्यः **डा. श्रिष्टि लक्ष्मीधरशर्ममहोदयेभ्यः** नमस्सुमाञ्जलिमर्पयामि ।

अस्य ग्रन्थस्य मुखपुटनिर्माणे सहकृतवते मन्मित्रमणये **विकाससिंहाय** साधुवादान् विज्ञापयामि । एवमस्य ग्रन्थस्य प्रत्यक्षतः उत परोक्षतः वा सहकृतवद्भ्यः सर्वेभ्यः मम धन्यवादान् वितनोमि।

एवञ्च इयं **सारसञ्चिका** कालिदासकृत्यभिमानिभ्यः संस्कृतभाषाजिज्ञासुभ्यः, विद्यापीठीय-प्राक्शास्त्रिछात्रेभ्यश्च अत्यन्तोपकारी। अस्यां यदि दुरवगाहकांशाः सन्ति तर्हि ते मत्कृताः एव। सहृदयाः यदि संसूचयन्ति भाविनि मुद्रणे अवश्यं संशोधयामि इति विज्ञापयन् विरमामि।

इत्थम्

विद्वज्जनाश्रयः

स्थलम् : तिरुपति
दिनाङ्कः : 10-10-2011
श्रीखरनामसंवत्सर-आश्वयुज-
शुक्ल-चतुर्दशी, सोमवासरः

- पठान् वलि साहेब्

श्रीमहाकविकालिदासप्रणीतम्

कुमारसम्भवम्

द्वितीयसर्गः

परीक्षोपयोगीनी सारसञ्चिका

अथ प्रस्तुतकथानुकूलं कथनान्तरमारभते –

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः।। १।।

पदच्छेदः :– तस्मिन्, विप्रकृताः, काले, तारकेण, दिवौकसः, तुरासाहम्, पुरोधाय, धाम, स्वायंभुवम्, ययुः।

अन्वयक्रमः :– तस्मिन् काले तारकेण विप्रकृताः दिवौकसः तुरासाहं पुरोधाय स्वायंभुवं धाम ययुः।

प्रतिपदार्थाः :–

तस्मिन् काले	= सदाशिवस्य पार्वतीशुश्रूषाकाले
तारकेण	= तारकनामधेयेन वज्रनखपुत्रेण केनचित् असुरेण
विप्रकृताः	= उपप्लुताः / पीडिताः
दिवौकसः	= देवाः
तुरासाहम्	= इन्द्रम्।
पुरोधाय	= पुरस्कृत्य/अग्रे संस्थाप्य
स्वायंभुवम्	= ब्रह्मलोकम्/सत्यलोकम्
धाम	= स्थानम्
ययुः	= जग्मुः।।

भावः :– यस्मिन् समये पार्वती सदाशिवस्य सेवां कुर्वती आसीत् तस्मिन् समये वज्रनाभपुत्रेण तारकासुरेण पीडिताः देवाः इन्द्रं प्रार्थनाय अग्रे संस्थाप्य, स्वायंभुवं धाम (ब्रह्मलोकम्) अगच्छन्।

विशेषांशाः :–

१. दिवौकसः – दिवम् = स्वर्गः, द्यौः ओकः = स्थानम् येषां ते – दिवौकसः = **देवाः**।
२. स्वायंभुवम् – ब्रह्मणः इदम् स्वायंभुवम्। स्वस्य भूः स्वभूः तस्य भावः स्वायंभूः तम्।
३. तुरासाहम् – तुरं – त्वरितम्, साहयति अभिभवति इति तुराषाट्। तं तुरासाहम् –**इन्द्रम्**।

१. हिरण्यगर्भो लोकेशः स्वयम्भूश्च चतुराननः इत्यमरः।

देवानां ब्रह्मणो दर्शनप्रकारमाह–

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव।। २।।

पदच्छेदः :– तेषाम्, आविः, अभूत्, ब्रह्मा, परिम्लानमुखश्रियाम्, सरसाम्, सुप्तपद्मानाम्, प्रातः दीधितिमान्, इव।

अन्वयक्रमः :– परिम्लानमुखश्रियां तेषां ब्रह्मा सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव आविः अभूत्।

प्रतिपदार्थाः :–

परिम्लानमुखश्रियाम्	= परिक्षीणा मुखकान्तिः येषाम्
तेषाम्	= देवानाम् (पुरतः)
ब्रह्मा	= विधाता
सुप्तपद्मानाम्	= मुकुळीकृत–अरविन्दानाम्
सरसाम्	= तटाकानाम् (पुरतः)
प्रातः	= प्रातःकाले
दीधितिमानिव	= सूर्य इव
आविः	= प्रकाश्यः
अभूत्	= अभवत्।

भावः :– तारकासुरस्य भयात् परिक्षीणमुखकान्तियुक्तानां तेषां देवानां पुरतः ब्रह्मदेवः एवं प्रत्यक्षोऽभूत्, यथा प्रातःकाले मुकुलितपद्मयुक्तानां सरसां (तटकानां) सम्मुखम् उदीयमानो सूर्यः प्रत्यक्षो भवति तथा।

विशेषांशाः :–

१.परिम्लानमुखश्रियाम् – मुखस्य श्रीः मुखश्रीः। परिम्लाना = परिक्षीणा, मुखश्रीः = मुखकान्तिः येषां ते परिम्लानमुखश्रियः। तेषां परिम्लानमुखश्रियाम्। **२. सुप्तपद्मानाम् –** सुप्तानि पद्मानि तेषां तानि सुप्तपद्मानि। तेषां सुप्तपद्मानाम्। **३. दीधितिमान् –** दीधितिः अस्य अस्तीति दीधितिमान्।

१. प्रकाशे प्रादुराविस्स्यात् इत्यमरः। २. **ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः** इत्यमरः।

सूर्योपमानेन देवानां म्लानतापहरणं सूचितम्। अत्र उपमालङ्कारः।

देवकर्तृकं ब्रह्मोपस्थानमाह–

अथ सर्वस्य धातारं ते सर्वे सर्वतो मुखम्।
वागीशं वाग्भिरर्थ्याभिः प्रणीपत्योपतस्थिरे।। ३।।

पदच्छेदः :– अथ, सर्वस्य, धातारम्, ते, सर्वे, सर्वतः, मुखम्, वागीशम्, वाग्भिः, अर्थ्याभिः, प्रणिपत्य, उपतस्थिरे।।

अन्वयक्रमः :– अथ ते सर्वे सर्वतोमुखं वागीशम् सर्वस्य धातारं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे।

प्रतिपदार्थाः :–

अथ	= आविर्भावानन्तरम्
ते	= देवाः
सर्वे	= सर्वे
सर्वतो मुखम्	= चतुर्मुखम्
वागीशम्	= वाचाम् ईशम्
सर्वस्य	= जगतः
धातारम्	= स्रष्टारम् (= ब्रह्माणम्)
प्रणिपत्य	= नमस्कृत्य
अर्थ्याभिः	= अर्थात् अनपेताभिः (= अर्थयुक्ताभिः, धर्मपथ्यर्थन्यायात् अनपेताभिः।)
वाग्भिः	= वचोभिः
उपतस्थिरे	= तुष्टुवुः (= स्तुतिं/पूजां कृतवन्तः)।।

भावः :– ब्रह्मदेवस्य प्रकटानानन्तरम् ते सर्वे देवाः सर्वतो मुखम् (चतुर्मुखम्), वागीशम् (वाणीपतिम्) सर्वस्य धातारं तं ब्रह्मदेवं प्रणामपूर्वकम् अर्थयुक्तवचसा एवं तुष्टुवुः।

विशेषांशाः :–

१. **सर्वतोमुखम् –** सर्वतः मुखानि यस्य सः, सर्वतोमुखः। तम् सर्वतोमुखम् = ब्रह्माणम्।
२. **वाचामीशम् –** वाचाम् – विद्यानाम् ईशः – प्रभुः/स्वामी। तं वीगीशम्।
३. **अर्थ्याभिः** अर्थादनपेताभिः अर्थ्याः, ताभिः अर्थ्याभिः।

१. **वीगीशो वाक्पतिः समौ** इत्यमरः।

२. **उपाद्देवपूजा सङ्गतिकरण–मित्रकरण–पथिष्विति वक्तव्यम्।** (पा.वा.)

अथ द्वादशभिः श्लोकैः ब्रह्मणः स्तुतिप्रकारं प्रपञ्चयन् आदौ तस्य त्रिमूर्तिसृष्टौ कारणत्वम् आह–

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे।। ४।।

पदविभागः :– नमः, त्रिमूर्तये, तुभ्यं, प्राक्, सृष्टेः, केवलात्मने, गुणत्रयविभागाय, पश्चात्, भेदम्, उपेयुषे।

अन्वयक्रमः :– हे भगवन्! सृष्टेः प्राक् केवलात्मने, पश्चात् गुणत्रयविभागाय भेदम् उपेयुषे (अत एव) त्रिमूर्तये तुभ्यं नमः।

प्रतिपदार्थाः :– (४–१५ श्लोकपर्यन्तं **'हे भगवन्'** इति पदम् संयोजनीयम्।) हे भगवन् !

सृष्टेः प्राक्	= जगतः सृष्टेः पूर्वस्मिन् काले
केवलात्मने	= एकरूपाय (श्रुतिः– **आत्मा वा इदमेक एवाग्र आसीत्** इति।)
(तुभ्यं नमः।)	
पश्चात्	= सृष्टिप्रवृत्तिकाले
गुणत्रयविभागाय	= सत्त्वरजस्तमोरूप–गुणत्रय–विभागाय
भेदम्	= उपाधिम् /स्रष्टृत्वादिकम्
उपेयुषे	= प्राप्तवते
त्रिमूर्तये	= ब्रह्म–विष्णु–रुद्ररूपिणे (तुभ्यम्)
नमः	= नमस्कारः।

भावः :– हे भगवन्! एतस्मात् जगत्सृष्टेः प्राक् त्वं केवलात्मा आसीत्। अतः केवलात्मने तुभ्यं नमः। तस्मात् अनन्तरं सृष्टिप्रवृत्तिकाले सत्त्व–रजः–तमोरूपगुणविभागाय उपाधिभेदं प्राप्तवते ब्रह्म–विष्णु–रुद्ररूपत्रिमूर्तिस्वरूपाय तुभ्यं नमः।

विशेषांशाः :– १. केवलात्मने– केवलः आत्मा यस्य सः केवलात्मा। तस्मै केवलात्मने। **२. गुणत्रयविभागाय –** विभज्यते अनेनेति विभागः। विभागः = भेदोपाधिः। गुणानां सत्त्वादीनाम् त्रयमेव विभागो यस्य तस्मै – गुणत्रयविभागाय। गुणास्सत्त्वं रजस्तम इत्यमरः। **३. त्रिमूर्तिये –** तिस्रः मूर्तयः यस्य सः त्रिमूर्तिः तस्मै त्रिमूर्तये।

१. **गुणाः सत्त्वं रजस्तमाः** इत्यमरः।

२. **नमस्स्वस्तिस्वाहास्वधालंवषट् योगात् च** (पा.सू. २.३.२६) इति चतुर्थी विभक्तिः।) उदा– सृष्टेः प्राक् **केवलात्मने** नमः।

३. **नमो रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च।**

तमो रूपाय संहारे त्रिरूपाय स्वयंभुवे।। इति।

अथ संसारसृष्टिप्रकारमाह–

यदमोघमपामन्तरुप्तं बीजमज! त्वया।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे।।५।।

पदविभागः :– यत्, अमोघम्, अपाम्, अन्तः, उप्तम्, बीजम्, अज!, त्वया, अतः, चराचरम्, विश्वम्, प्रभवः, तस्य, गीयसे।

अन्वयक्रमः :– हे अज! अपाम् अन्तः त्वया यत् अमोघं बीजम् उप्तम्। अतः चराचरं विश्वं (जातम्) तेन तस्य प्रभवः गीयसे।

प्रतिपदार्थाः :–

हे भगवन् !

अज!	= हे जन्मरहित! (न जायते इत्यज!)(त्वया)
अपाम् अन्तः	= अपां मध्ये
यत्	= यस्मात् हेतोः
अमोघम्	= अवन्ध्यम्
बीजम्	= वीर्यम् (**शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च** इत्यमरः।)
उप्तम्	= निक्षिप्तम्/विसृष्टम् (अतः तव बीजात्)
चराचरम्	= (चरं च अचरं च चराचरम्) जङ्गमस्थावरात्मकम्
विश्वम्	= जगत् (उत्पन्नम्।)
अतः	= तस्मात् कारणात्
तस्य	= बीजस्य
प्रभवः	= (प्रभवति अस्मात् इति प्रभवः) उत्पत्तेः कारणम् (लोकः)
गीयसे	= गीयते।

भावः :– हे अज! आपाम् सृष्टेः अनन्तरं तस्मिन् जले त्वया अमोघं बीजं (वीर्यम्) निक्षिप्तम्। तस्मात् कारणात् एतत् चराचरात्मकं जगत् उत्पन्नम्। अतः लोकः अपि 'विश्वस्य उत्पत्तेः कारणं परमेश्वरेण निक्षिप्तः बीज एव' इति गीयते।। ५।।

विशेषांशाः :– १.हे अज ! – जायते इति अजः। तत्सम्बुद्धौ हे अज !। **२. अमोघम् –** न मोघम् अमोघम्। **३. चराचरम् –** चरन्ति इति चराः, न चराः – अचराः। चराश्च अचराश्चेति चराचरं तत् चराचरम्। **४. प्रभवः –** प्रभवति अस्मात् इति प्रभवः।

अप एव ससर्जादौ तासु बीजमपासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।। इति मनुस्मृतिः ।
अतश्चराचरं विश्वं प्रसवस्तस्य गीयते इति श्लोकपाठः।

अत इदं चराचरं विश्वं तस्य बीजस्य प्रसवो गीयते इति तु लोकपाठः।)

ननु त्वं न केवलं सृष्टेः कारणमसि किन्तु स्थितिसंहारयोरपि इत्याह–

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः।। ६।।

पदच्छेदः :– तिसृभिः, त्वम्, अवस्थाभिः, महिमानम्, उदीरयन्, प्रलयस्थितिसर्गाणाम्, एकः कारणतां गतः।

अन्वयः :– एकः त्वम्, तिसृभिः अवस्थाभिः महिमानम् उदीरयन् प्रलयस्थितिसर्गाणां कारणतां गतः।

प्रतिपदार्थाः :–

हे भगवन् –

एकः	= केवलात्मास्वरूपः
त्वम्	= भवान्
तिसृभिः	= त्रैगुण्यमयीभिः
अवस्थाभिः	= हरि–हर–ब्रह्मस्वरूपाभिः
महिमानम्	= निजशक्तिम्
उदीरयन्	= उजृम्भयन्
प्रलय–स्थिति–सर्गाणाम्	= अन्त–स्थिति–उत्पत्तीनां
कारणताम्	= हेतुतां
गतः	= प्राप्नोति

भावः :– हे भगवन्! सृष्टेः प्राक् केवलात्मा भवान्, सृष्टेः पश्चात् हरि–हरहिरण्यगर्भरूपैः त्रिभिः अवस्थाविशेषैः आत्मनः महिमानं प्रकटयन्, जगतः प्रलयस्य, संस्थितेः, सृष्टेश्च कारणतां भजते।।६ ।।

विशेषांशाः :– १. उदीरयन् – उदीरयति इति उदीरयन्। **२. प्रलयस्थितिसर्गाणाम् –** प्रलयश्च

स्थितिश्च सर्गश्चेति प्रलयस्थितिसर्गाः। तेषां प्रलयस्थितिसर्गाणाम्। **३. कारणताम् –** कारणस्य भावः कारणता तां कारणताम्।

भूतसृष्टिकर्तृत्वम् उक्त्वा मिथुनसृष्ट्यर्थं मूर्तिमतो ब्रह्मणो भेदमाह–

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ।। ७।।

पदच्छेदः :– स्त्रीपुंसौ + आत्मभागौ, ते, भिन्नमूर्तेः, सिसृक्षया, प्रसृतिभाजः, सर्गस्य, तौ + एव, पितरौ, स्मृतौ।

अन्वयक्रमः :– सिसृक्षया भिन्नमूर्तेः ते स्त्रीपुंसौ आत्मभागौ स्तः। तौ एव प्रसूतिभाजः सर्गस्य पितरौ स्मृतौ।

सिसृक्षया	= स्रष्टुम् इच्छया
भिन्नमूर्तेः	= द्विधाकृतविग्रहस्य
ते	= तव
स्त्री–पुंसौ	= स्त्री च पुरुषः च
आत्मभागौ	= आत्मनः देहस्य भागौ
स्तः	= विद्येते।
तौ एव	= आत्मभागौ एव
प्रसूतिभाजः	= उत्पत्तिभाजः
सर्गस्य	= निजसृष्टेः
पितरौ	= जननी–जनकौ
स्मृतौ	= कथ्येते।

भावः :– हे भगवन् ! यदा भवतः स्रष्टुम् इच्छा वर्तते तदा आत्मनः शरीरस्य स्त्री–पुरुषभागौ अभवताम्। अतः स्त्री पुरुषश्च द्वावपि भवतः समानभागौ स्तः। अस्मात् कारणात् तौ द्वावपि उत्पत्स्यमानसृष्टेः माता पितरौ कथ्येते।। ७।।

विशेषांशाः :– १. स्त्रीपुंसौ – स्त्री च पुमान् च स्त्रीपुंसौ। **२. सिसृक्षया –** स्रष्टुमिच्छा सिसृक्षा तया सिसृक्षया। **३. भिन्नमूर्तये –** भिन्ना मूर्तिः यस्य सः भिन्नमूर्तिः तस्य भिन्नमूर्तेः। **४. आत्मभागौ –** आत्मनः भागौ आत्मभागौ। **५. प्रसूतिभाजः –** प्रसूतिं भजति इति प्रसूतिभाक् तस्य प्रसूतिभाजः। **६. सर्गस्य –** सृज्यते इति सर्गः तस्य – सर्गस्य। **७. पितरौ –** माता च पिता च पितरौ, मातापितरौ वा '**पिता मात्रा** (पा.सू.१.२.७०)' इति एकशेषः।

१. आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि इति विश्वकोशः। **२. स्त्रीर्योषिदबला योषा**

नारी समन्तिनी वधूः इत्यमरः। **३. स्युः पुमांसः पञ्चजनाः पुरुषः पूरुषा नराः** इत्यमरः।

५. **द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत्।**
अर्धेन नारी तस्यां स विराजमसृजत् प्रभुः ।। इति मनुस्मृतिः।

स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते।
यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ।। ८।।

पदच्छेदः :– स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते यौ तु स्वप्नावबोधौ तौ (एव) भूतानां प्रलयोदयौ स्तः।

अन्वयक्रमः :– स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते यौ तु स्वप्नावबोधौ तौ (एव) भूतानां प्रलयोदयौ स्तः।

प्रतिपदार्थाः :–

स्वकालस्य परिमाणेन	= आत्मनः समयप्रमाणेन
व्यस्तरात्रिंदिवस्य	= विभक्तनिशा–अहनिरूपस्य ब्रह्मणः
व्यस्तम्	= विभक्तम्,
ते तु	= तव तु
यौ स्वप्नावबोधौ	= यौ शयन–प्रबोधौ (निद्रा–जगृती)
तौ	= तौ
भूतानाम्	= समस्तप्राणिसमूहस्य
प्रलय–उदयौ	= संहार–सृष्टी (स्तः।)

भावः :– हे भगवन्! आत्मनः कालपरिमाणस्य रात्रिः इति, दिवः इति चेति द्वौ विभागौ आत्मनः एव स्वप्न–अवबोधौ स्तः। तथा तौ द्वावपि एतस्य जगतः सृष्टेः प्रलयं, प्रबोधं च कथ्येते।। ८ ।।

विशेषांशाः :– १. स्वकालपरिमाणेन – स्वस्य कालः स्वकालः। स्वकालस्य परिमाणः स्वकालपरिमाणः। तेन स्वकालपरिमाणेन। **२. व्यस्तरात्रिन्दिवस्य –** रात्रिश्च दिवा च रात्रिन्दिवम्। व्यस्तं रात्रिन्दिवम् यस्य सः व्यस्तरात्रिन्दिवः, तस्य व्यस्तरात्रिन्दिवस्य। **३. स्वप्नावबोधौ –** स्वप्नश्च अवबोधश्चेति स्वप्नावबोधौ। **४. प्रलयोदयौ –** प्रलयश्च उदयश्च प्रलयोदयौ।

१. **चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते।**

३. **यदा स देवो जागर्ति तदैव चेष्टते जगत्।**
यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते।।

सृष्टि–प्रलयादिकं ब्रह्मणः दैनन्दिनं (प्रतिदिनं) कर्म भवति। परं ब्रह्मणः वर्षशतान्ते महाप्रलयः सम्भवति।

यदि चत्वारः युगाः (कृत–त्रेता–द्वापर–कलियुगाः) सहस्रवारम् अतीताः भवन्ति तर्हि ब्रह्मणः एकः अहः एवं रात्रिश्च भवति। तस्य च **कल्पः** इति नाम भवति। यावत्कालः ब्रह्मणः स्वापकालः अस्ति तावत्कालः सकलप्राणिनां प्रलयकालः भवति। तस्य प्रातःकालः = यावत् तस्य प्रबोधकालः तावदेव कालः समस्तप्राणिनां सृष्टिकालः।

ननूपादानं विना कथं स्वप्न–जागरणमात्रेण संसार–प्रलयोद्भवौ इत्याह –

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः।। ९।।

पदच्छेदः :– जगद्योनिः, अयोनिः, त्वम्, जगदन्तः, निरन्तकः, जगदादिः, अनादिः, त्वम्, जगदीशः, निरीश्वरः।

अन्वयक्रमः :– हे भगवन् ! त्वं जगद्योनिः किन्तु स्वयम् अयोनिः, त्वं जगदन्तः किन्तु स्वयं निरन्तकः, त्वं जगदादिः किन्तु स्वयम् अनादिः, त्वं जगदीशः स्वयं निरीश्वरः असि।

प्रतिपदार्थाः :–

त्वं	= भवान्
जगद्योनिः	= जगत्कारणम्
स्वयम्	= स्वयमात्मा
ओयोनिः	= अनादित्वात् अकारणकः त्वम्।
अन्तः	= अन्तयति/नाशयति इत्यन्तः
जगत् + अन्तः	= जगतः संहर्ता
स्वयं निरन्तकः	= नित्यत्वात् अन्तरहितः
त्वम्	= भवान्
जगदीशः	= जगताम् ईशः नियन्ता
स्वयं निरीश्वरः	= स्वयम् अनियम्यः असि।

भावः :– हे भगवन् भवान् स्थावरजङ्गमात्मकः अस्य जगतः (योनिः) कारणभूतः अस्ति। किन्तु स्वयं भवान् (अयोनिः) कारणरहितः अस्ति। (भवतः किमपि कारणं नास्ति।) भवान् जगतः अन्तकः अस्ति। किन्तु भवान् स्वयं निरन्तकः अस्ति। (किन्तु भवतः अन्तकः कोपि नास्ति।) एवं भवान् अस्य विश्वस्य आदौ अवश्यं वर्तते एव। परन्तु स्वयं भवान् अनादिः वर्तते। भवान् अस्य सृष्टेः नायकः/ईश्वरः विद्यते। किन्तु स्वयं निरीश्वरः विद्यते। (भवतः ईश्वरः/नायकः कोऽपि न विद्यते एव।)।। ९।।

विशेषांशाः :–

१. जगद्योनिः – जगतः योनिः जगद्योनिः। **२. अयोनिः –** न विद्यते योनिः यस्य सः अयोनिः।

३. **जगदन्तः** – जगतः अन्तः जगदतः। ४. **निरन्तकः** – निर्गतः अन्तो यस्मात् सः निरन्तकः।
५. **जगदादिः** जगतः आदिः जगदादिः। ६. **अनादिः** अविद्यमानः आदिः यस्य सः अनादिः।
७. **जगदीशः** – जगताम् ईशः जगदीशः। ८. **निरीश्वरः** – निर्गतः ईश्वरो यस्मात् सः निरीश्वरः।

अत्र श्लोके विरोधाभासालङ्कारः, **विरोधे तु विरोधाभासः** – इति लक्षणात्।

ननूत्पादकान्तरराहित्ये दृश्यमानस्य चतुर्मुखस्य कथमुत्पत्तिरित्याह –

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे।। १०।।

पदच्छेदः :– आत्मानम्, आत्मना, वेत्सि, सृजसि, आत्मानम्, आत्मना, अत्मना, कृतिना, च, त्वम्, आत्मनि, एव, प्रलीयसे।

अन्वयक्रमः :– हे भगवन् ! त्वम् आत्मानम् आत्मना एव वेत्सि। आत्मानम् आत्मना सृजसि कृतिना आत्मना च आत्मनि एव प्रलीयसे।

प्रतिपदार्थाः :–

त्वम्	= भवान्
आत्मानम्	= लोकानुग्रहार्थं ब्रह्मरूपेणोत्पिपादयिषितं स्वस्वरूपम्
आत्मना एव	= स्वयमेव
वेत्सि	= जानासि।
आत्मानम्	= स्वम्
आत्मनैव	= स्वस्मिन्नेव
सृजसि	= उत्पादयसि।
कृतिना	= समर्थेन
आत्मना	= स्वेनैव
आत्मन्येव	= स्वस्मिन्नेव
प्रलीयसे	= प्रलीनो भवसि।

भावः :– हे भगवन्! भवान् लोकानुग्रहार्थं ब्रह्मस्वरूपात् उत्पत्स्यमानम् आत्मानं स्वयं जानाति।

तथैव आत्मानं स्वयमेव स्वात्मस्वरूपे सृष्टिं करोति। एवम् आत्मनः अधिष्ठानमपि भवानेव अस्ति। सामर्थ्यकारणात् स्वयमेव स्वात्मनि प्रलीनो भवति। भवतः प्रपञ्चस्य इव ज्ञानोत्पत्ति–लयेषु अधिकापेक्षा नास्ति – इति सारांशः।। १०।।

विशेषांशाः :– १. कृतिना – कृतम् अस्य अस्ति इति कृती। तेन कृतिना।

ब्रह्मणोऽणिमादिसिद्धिषु स्वाधीनत्वमाह –

द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूषितम्।। ११।।

पदच्छेदः :– द्रवः, सङ्घातकठिनः, स्थूलः, सूक्ष्मः, लघुः, गुरुः, व्यक्तः, व्यक्तेतरः, च, असि, प्राकाम्यम्, ते, विभूतिषु।

अन्वयक्रमः :– हे भगवन् ! त्वं द्रवः संघातकठिनः स्थूलः सूक्ष्मः लघुः गुरुः व्यक्तः व्यक्तेतरः च असि। विभूतिषु ते प्राकाम्यम् अस्ति।

प्रतिपदार्थाः :–

त्वम्	= भवान्
द्रवः	= सरित्समुद्रादिवत् रसात्मकः
असि	= भवसि।
सङ्घातकठिनः	= निबिडसंयोगेन कठिनः महीधरादिवत् (असि)
स्थूलः	= इन्द्रियग्रहणयोग्यः घटादिवत् (असि)
सूक्ष्मः	= अतीन्द्रियः परमाण्वादिवत्
गुरुः	= हेमाद्रिवत् अचलनीयः
व्यक्तः	= कार्यरूपः
असि	=
व्यक्तेतरः	= कारणरूपश्च (असि)
विभूतिषु	= अणिमादिषु
ते	= तव
प्राकाम्यम्	= यथाकामत्वम्

भावः :– हे भगवन्! त्वं सरित्समुद्रादिवत् द्रवः (रसात्मकः) असि, पृथवी–पर्वतादिवत् कठिनः असि। घटादिपदार्थवत् इन्द्रियग्राह्यः स्थूलरूपः असि, परमाण्वादिवत् अतीन्द्रियः चासि। कार्पासादिवत् लघुः तथा पर्वतादिवत् भवान् अचलोऽपि विद्यते। भवान् घटादिवत् कार्यरूपेण व्यक्तः तथा कार्याणां

कारणरूपत्वेन अव्यक्तोऽपि वर्तते। एवम् अणिमाद्यष्टसिद्धिषु भवतः यथेष्टं प्राकाम्यं भवति। अतः सर्वं त्वमेव असि।। ११।।

विशेषांशाः :– १. सङ्घातकठिनः – सङ्घातेन कठिनः सङ्घातकठिनः। **२. व्यक्तेतरः –** व्यक्तात् इतरः व्यक्तेतरः।

वेदानां ब्रह्मण उद्भवमाह –

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्।। १२।।

पदच्छेदः :– उद्घातः, प्रणवः, यासाम्, न्यायैः, त्रिभिः, उदीरणम्, कर्म, यज्ञः, फलम्, स्वर्गः, तासाम्, त्वम्, प्रभवः, गिराम्।

अन्वयक्रमः :– हे भगवन् ! यासां गिराम् उद्घातः प्रणवः, यासां त्रिभिः न्यायैः उदीरणं, यासां कर्म यज्ञः, फलं स्वर्गः तासां गिरां प्रभवः असि।

प्रतिपदार्थाः :–

यासां गिराम्	= यासां वाचाम्,	उद्घातः	= उपक्रमः
प्रणवः	= ॐकारात्मकः ,	यासां गिरां	= यासां वाचाम्
त्रिभिः	= उदात्त–अनुदात्त–स्वरितैः,	न्यायैः	= स्वरैः
उदीरणम्	= उच्चारणम्,	यासां कर्म	= यासां प्रतिपाद्यम्
यज्ञः	= ज्योतिष्टोमादिः (न तु चैत्यवन्दनादिः)।		
फलम्	= कर्म माध्यमेन स्वर्गः		
त्वम्	= भवान्		
तासां गिराम्	= तासां वेदानाम्		
प्रभवः	= कारणम् (प्रणेता / स्मर्ता वा इति पाठान्तरम्)		

भावः :– हे भगवन्! यस्याः वेदरूपवाण्याः उद्घातः (आरम्भः) प्रणवः (ॐकारः) अस्ति तथैव यस्याः वाण्याः उच्चारणम् उदात्त–अनुदात्त–स्वरितरूपैः त्रिभिः स्वरैः उच्चरितो भवति, यया वाण्या ज्योतिष्टोमादियज्ञानां निर्वहणं भवति, अपि च येषां यज्ञानां फलं स्वर्गादिः अस्ति तास्याः वेदवाण्याः भवान् प्रभवस्थानम् (मूलकारणम्) विद्यते।। १२।।

विशेषांशाः :– १. ॐकार–प्रणवौ समौ। इति। **२. स्यादभ्यादानमुद्घात आरम्भः** इति चामरः। इदमुपसंहारस्यापि लक्षणम् –

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वतः।
दहत्येनः कृतं पूर्वं परस्ताच्च विशेषतः।। इति निरुक्तपरिशिष्टयोः यास्कः।

३. न्यायैः – नीयन्ते एभिः अर्थविशेषाः इति न्यायाः, तैः न्यायैः (स्वरैः)। उक्तं च स्वरविशेषात् अर्थप्रतिपत्तिः। यथा – **इन्द्रशत्रुः वर्धस्व** इति स्वरतोऽपराधात्। **४. कर्म –** क्रियते इति कर्म। **५. यज्ञः –** इज्यते अनेन इति यज्ञः। **६. प्रभवः –** प्रभवति अस्मात् इति प्रभवः। ७. कर्म–स्वर्गौ ब्रह्मापवर्गयोः अप्युपलक्षणे।

सांख्यशास्त्रप्रतिपाद्यौ प्रकृतिपुरुषौ त्वमेवासौ इत्याह –

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः।। १३।।

पदच्छेदः :– त्वाम्, आमनन्ति, प्रकृतिम्, पुरुषार्थप्रवर्तिनीम्, तद्दर्शिनम्, उदासीनम्, त्वाम्, एव, पुरुषम्, विदुः।

अन्वयक्रमः :– हे भगवन् ! त्वां पुरुषार्थप्रवर्तिनीं प्रकृतिम् आमनन्ति। त्वाम् एव तद्दर्शिनम् उदासीनं पुरुषं विदुः।

प्रतिपदार्थाः :–

त्वाम्	= भवन्तम्
पुरुषार्थप्रवर्तिनीम्	= पुरुषभोगापवर्गार्थं सम्प्रेरिकाम्
प्रकृतिम्	= त्रैगुण्यात्मकं मूलकारणम्
आमनन्ति	= कथयन्ति।
त्वाम् एव	= भवन्तमेव
(तां प्रकृतिम्)	
तद्दर्शिनम्	= साक्षित्वेन पश्यतीति
उदासीनम्	= कूटस्थम्
पुरुषम्	= पुरुषरूपतत्त्वम् (इत्यपि)
विदुः	= विन्दन्ति।

भावः :– हे भगवन्! सांख्यस्मृतिकाराः भवन्तं भोग–अपवर्गरूपपुरुषार्थाय प्रवर्तनीं मूलप्रकृतिम् आमनन्ति। अपि च पुरुषार्थाय प्रवर्तनरूपं प्रकृतिस्वरूपं त्वामेव तस्याः प्रकृतेः साक्षित्वेन दर्शकः कूटस्थः पुरुषः इत्यपि विन्दन्ति।। १३।।

विशेषांशाः :– १. पुरुषार्थप्रवर्तनीम् – पुरुषस्य अर्थः पुरुषार्थः। तस्मै प्रवर्तते तच्छीला पुरुषार्थप्रवर्तिनीम्। तां पुरुषार्थप्रवर्तिनीम्। **२. तद्दर्शिनीम् –** तां पश्यतीति तद्दर्शी तं तद्दर्शिनीम्।

३. **प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे** इति यादवः।

ब्रह्मणः सर्वपरत्वम् आह–

त्वं पितॄणामपि पिता देवानामपि देवता।
परतोऽपि परश्चासि विधाता वेधसामपि।। १४।।

पदच्छेदः :– त्वम्, पितॄणाम्, अपि, पिता, देवानाम्, अपि, देवता, परतः, अपि, परः, च, असि, विधाता, वेधसाम्, अपि।

अन्वयक्रमः :– हे भगवन् ! त्वं पितॄणाम् अपि पिता, देवानाम् अपि देवता, परतः अपि परः च असि। वेधसाम् अपि विधाता असि।

प्रतिपदार्थाः :–

हे भगवन्!

त्वम्	= भवान्
पितॄणाम् अपि	= अग्निषु आत्तादीनाम् अपि
पिता	= जनकः (तेषाम् अपि तर्पणीयः असि),
देवानाम् अपि	= इन्द्रादीनाम् अपि
देवता	= देवता (तेषामपि यजनीयः असि),
परतः अपि	= मायासंवलितब्रह्मणः अपि
परः च	= परब्रह्मस्वरूपः च (सर्वोत्तरः)
असि	= भवसि
वेधसाम् अपि	= दक्षादीनाम् अपि
विधाता	= स्रष्टा
असि	= भवसि।

भावः :– हे भगवन्! भवान् अग्निष्वात्तपितॄणाम् अपि तर्पणीयः पिता अस्ति, इन्द्रादिदेवानां अपि यजनीयः देवः अस्ति। मायासंवलितब्रह्मणः अपि परब्रह्मस्वरूपः विद्यते। जगतः सृष्टिकर्तॄणाम् मरीच्यादीनाम् प्रजापतीनाम् अपि सृष्टिकर्ता वर्तते। किन्तु त्वत्तः परः कोऽपि नास्ति।। १४।।

विशेषांशाः :– १. देवानाम् – दीव्यन्ति इति देवाः, तेषां देवानाम्। **२. देवता –** देव एव देवता। **३. वेधसाम् –** विदधति इति वेधसः, तेषां वेधसाम्।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः।।

महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।। इति सर्वोत्तरत्वाभिधानम्।

अथ ब्रह्मणः सर्वात्मकत्वप्रतिपादनपुरःसरं स्तुतिमुपसंहति –

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम्।। १५।।

पदच्छेदः :– त्वम्, एव, हव्यम्, होता, च, भोज्यम्, भोक्ता, च, शाश्वतः, वेद्यम्, च, वेदिता, च, असि, ध्याता, ध्येयम्, च, यत्, परम्।

अन्वयक्रमः :– हे भगवन् ! शाश्वतः त्वम् एव हव्यं होता च असि। भोज्यं भोक्ता च असि, वेद्यं वेदिता च असि, ध्याता यत् च परं ध्येयं तत् च असि।

प्रतिपदार्थाः :–

शाश्वतः	= शश्वत्सिद्धः /शाश्वतस्वरूपः
त्वम् एव	= त्वमेव
हव्यम्	= आज्यादिकम्
होता च	= यजमानः च
(असि	= भवसि)
भोज्यम्	= अभ्यवहार्यम्/ अन्नम्
भोक्ता च	= अन्नादः च
(असि	= भवसि)
वेद्यम्	= साक्षात्कार्यं वस्तु (घटादिः)
वेदिता च	= साक्षात्कर्ता च
(असि	= भवसि)
ध्याता	= स्मर्ता
यत् च परं ध्येयम्	= साक्षात्कारसाधनभूतप्रत्यय(ज्ञान)विशेषप्रवाहः
तत् च असि	= तच्च भवसि।

भावः :– हे भगवन्! त्वमेव पशुपुरोडाशादियज्ञसाधनद्रव्यस्वरूपः, तथा यजमानोऽपि त्वमेव असि। त्वमेव अन्नादिरूपेण भोज्यपदार्थः तथा तस्य भोज्यपदार्थस्य भोक्ता अपि त्वमेव असि। त्वमेव साक्षात् घटादिकार्यवस्तु असि, तथा त्वमेव तस्य साक्षात्कारे कर्ता अपि। एतावदेव न ध्याता अपि

त्वमेव तथा तस्मात् परं ध्येयम् अपि त्वमेव असि।। १५।।

विशेषांशाः :– १. शाश्वतः – शश्वत् भवः शाश्वतः। **२.हव्यम् –** हूयते यत् तत् हव्यम्। **३.होता –** जुहोति इति होता। **४. भोज्यम् –** भोक्तुं योग्यं भोज्यम्। **५. भोक्ता –** भुनक्ति इति भोक्ता। **६. वेद्यम् –** वेदितुं योग्यं वेद्यम्। **७. वेदिता –** वे वेत्ति इति वेदिता। **८. ध्याता –** ध्यायति इति ध्याता।

ब्रह्मणः प्रतिवचनम् आह–

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः।। १६।।

पदच्छेदः :– इति, तेभ्यः, स्तुतीः, श्रुत्वा, यथार्थाः, हृदयङ्गमाः, प्रसादाभिमुखः, वेधाः, प्रति + उवाच, दिवौकसः।

अन्वयक्रमः :– वेधाः इति तेभ्यः यथार्थाः हृदयङ्गमाः स्तुतीः श्रुत्वा, प्रसादाभिमुखः सन् दिवौकसः इति प्रत्युवाच।

प्रतिपदार्थाः :–

वेधाः	= ब्रह्मा
इति	= इत्थम्
तेभ्यः	= देवेभ्यः
यथार्थाः	= सत्याः
हृदयङ्गमाः	= मनोहराः
स्तुतीः	= स्तोत्राणि
श्रुत्वा,	= अनुश्रुत्य
प्रसादाभिमुखः सन्	= प्रसन्नानुग्रहप्रवणः सन्
दिवौकसः	= देवान्
प्रत्युवाच	= प्रत्युत्तरं ददौ।

भावः :– एवंप्रकारेण देवैः कृताः सत्याः मनोहराः च स्तुतीः श्रुत्वा प्रसन्नः ब्रह्मदेवः इन्द्रादिदेवैः सह इत्थम् अब्रवीत्।

विशेषांशाः :– १. वेधाः – विदधति इति वेधाः। **२. हृदयङ्गमाः –** हृदयं गच्छन्तीति हृदयङ्गमाः (मनोहराः)। **३.प्रसादाभिमुखः** – प्रसादे अभिमुखः प्रसादाभिमुखः। **४. दिवौकसः –** दिवः ओकः येषां ते दिवौकसः।

१. **स्रष्टा प्रजापतिर्वेधाः विधाता विश्वसृङ् विधिः** इत्यमरः।

ब्रह्मणः प्रतिवचने वैशिष्ट्यम् आह–

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।। १७।।

पदच्छेदः :– पुराणस्य, कवेः, तस्य, चतुर्मुखसमीरिता, प्रवृत्तिः, आसीत् + शब्दानाम्, चरितार्था, चतुष्टयी।

अन्वयक्रमः :– चतुष्टयी शब्दानां प्रवृत्तिः पुराणस्य कवेः तस्य चतुर्मुखसमीरिता सती चरितार्था आसीत्।

प्रतिपदार्थाः :–

चतुष्टयी	= चतुर्विधा (द्रव्य–गुण–क्रिया–जातिभेदाः)
शब्दानां	= पदानाम्
प्रवृत्तिः	= वैखरीप्रमुखा वाग्वृत्तिः
पुराणस्य	= पुरातनस्य
कवेः	= कवयितुः
तस्य	= ब्रह्मणः
चतुर्मुखसमीरिता सती	= चतुर्भिः मुखैः उच्चारिता सती
चरितार्था	= अन्वर्था (सफलम्)
आसीत्।	= अभूत्।

भावः :– शब्दानां प्रवृत्तिः चतुर्धा भवति। तद्यथा – द्रव्य–जाति–गुण–क्रियाः अथवा परा, पश्यन्ती, मध्यमा, वैखरी इति चत्वारः प्रकाराः शब्दानां प्रवृत्तिः तदा पुराणपुरुषस्य ब्रह्मदेवस्य चतुर्भिः मुखैः निर्गमनात् ब्रह्मणः चतुर्मुखत्वम् चरितार्थम् अभूत्।। १७।।

विशेषांशाः :–१. चतुष्टयी – चत्वारः अवयवाः यस्याः सा चतुष्टयी। **२. पुराणस्य –** पुरा अपि नव

इव इति पुराणः, तस्य पुराणस्य। **३.चतुर्मुखसमीरिता –** चतुर्भिः मुखैः समीरिता चतुर्मुखसमीरिता।

१. द्रव्य–गुण–क्रिया–जातिभेदेन चत्वारः अवयवाः यस्याः सा – चतुष्टयी

२. **वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा।**
द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी।।

भगवानाह – (इतःपरम् एकादशभिः (१८–२८) श्लोकैः परमेष्ठिनः प्रतिवचनप्रकारं प्रपञ्चयति –)

स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः।। १८।।

पदच्छेदः :– स्वागतम्, स्वान्, अधीकारान्, प्रभावैः, अवलम्ब्य, वः, युगपत्, युगबाहुभ्यः, प्राप्तेभ्यः, प्राज्यविक्रमाः।

अन्वयक्रमः :– हे प्राज्यविक्रमाः! स्वान् अधीकारान् प्रभावैः अवलम्ब्य, युगपत् प्राप्तेभ्यः युगबाहुभ्यः वः स्वागतम्।

प्रतिपदार्थाः :–

हे प्राज्यविक्रमाः!	= प्रभूतपराक्रमाः देवाः!
स्वान्	= स्वकीयान्
अधीकारान्	= अभियोगान्
प्रभावैः	= सामर्थ्यैः
अवलम्ब्य,	= आस्थाय (यथाधिकारं स्थित्वाऽपि)
युगपत्	= समकालम्
प्राप्तेभ्यः	= लब्धेभ्यः समागतेभ्यः
युगबाहुभ्यः	= दीर्घबाहुभ्यः (आजानुबाहुभ्यः)
वः	= युष्मभ्यम्
स्वागतम्।	= शोभनागमनम्

भावः :– हे अत्यन्तपराक्रमशालिनः देवाः! स्वकीयान् अधिकारान् स्वसामर्थ्येन धृतवतोऽपि सर्वे च युगवत् समागतेभ्यः युष्मभ्यं सुस्वागतम्।

विशेषांशाः :– १. हे प्राज्यविक्रमाः – प्राज्यः विक्रमः येषां ते प्राज्यविक्रमाः। तत् सम्बुद्धौ हे प्राज्यविक्रमाः। २. **युगबाहुभ्यः –** युगौ इव बाहू येषां ते युगबाहवः तेभ्यः युगबाहुभ्यः। **३.स्वागतम् –** शोभनम् आगतं स्वागतम्।

१. **प्राज्यं भूरि प्रभूतं च** इति यादवः। **प्रभूतं प्रचुरः प्राज्यपदभ्रैर्बहुलं बहु –** इत्यमरः।
२. **अधीकारान्** इत्यत्र **उपसर्गस्य घञि** इति वा दीर्घः।
३. **युगपत्प्राप्त्या महत्कार्यमनुमीयते** इति भावः।
४. **भुजबाहू प्रवेष्टो दोः –** इत्यमरः। आजानुबाहुत्वं भाग्यलक्षणम्।
५. युष्मभ्यम्/**वः** इत्यत्र बहुवचनस्य वस्नसौ।

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः।। १९।।

पदच्छेदः :– किम्, इदम्, द्युतिम्, आत्मीयाम्, न, बिभ्रति, यथा, पुरा, हिमक्लिष्टप्रकाशानि, ज्योतींषि + इव, मुखानि, वः।

अन्वयक्रमः :– हे वत्साः ! हिमक्लिष्टप्रकाशानि ज्योतींषि इव वः मुखानि पुरा यथा आत्मीयां द्युतिं न बिभ्रति। इदं किम् ?

प्रतिपदार्थाः :–

हे वत्साः !	= हे पुत्रकाः
हिमक्लिष्टप्रकाशानि	= नीहारमन्दप्रभाणि
ज्योतींषि इव	= नक्षत्राणि इव
वः मुखानि	= युष्माकं मुखानि
पुरा यथा	= पूर्वम् इव
आत्मीयां	= आत्मनः सम्बद्धम्
द्युतिं	= कान्तिम्
न बिभ्रति।	= न धरति ।
इदं किम् ?	= अस्य कारणं किम् स्यात् ?

भावः :– हे वत्साः ! यथा नीहारेण नक्षत्रद्युतिः मलीना भवति तद्वत् युष्माकमपि मुखानि पूर्वमिव स्वाभाविककान्तिम् न धृत्वा, मलिनानि सञ्जातानि। अस्य कारणं किम् भवेत्।

विशेषांशाः :– १.हिमक्लिष्टप्रकाशानि – हिमेन क्लिष्टः प्रकाशः येषां तानि हिमक्लिष्टप्रकाशानि। **२. आत्मीयाम्–** आत्मनः इयम् आत्मीया, ताम् आत्मीयाम्।

१. **दीप्ति–तारा–हुताशेषु ज्योतिः** इति शाश्वतः।

प्राधान्यात् इन्द्रस्यावस्थां प्रदर्शयति –

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते।। २०।।

पदच्छेदः :– प्रशमात्, अर्चिषाम्, एतत्, अनुद्गीर्णसुरायुधम्, वृत्रस्य, हन्तुः, कुलिशम्, कुण्ठिताश्रि + इव लक्ष्यते ?

अन्वयक्रमः :– अर्चिषां प्रशमात् अनुद्गीर्णसुरायुधम् एतत् वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रि इव लक्ष्यते ?

प्रतिपदार्थाः :–

अर्चिषाम्	= तेजसाम्
प्रशमात्	= निर्वाणात्
अनुद्गीर्णसुरायुधम्	= अनुदितचित्रप्रभम्
एतत् वृत्रस्य	= अस्य इन्द्रस्य
हन्तुः	= संहर्तुः
कुलिशं	= वज्रम्
कुण्ठिताश्रि इव	= नष्टकान्तिः इव
लक्ष्यते ?	= दृश्यते।

भावः :– इन्द्रस्य तेजसः नष्टकारणात् चित्र–विचित्रप्रभाभिः हीनत्वेन दृश्यमानम् एतत् इन्द्रस्य

वज्रायुधम् हतश्री इव किमर्थं दृश्यते ?

विशेषांशाः :– १. अनुद्गीर्णसुरायुधम् – न उद्गीर्णम् अनुद्गीर्णम्। सुराणाम् आयुधम् सुरायुधम्। अनुद्गीर्णं सुरायुधम् इति अनुद्गीर्णसुरायुधम्। **२. हन्तुः –** हन्ति इति हन्ता, तस्य हन्तुः। **३.कुण्ठिताश्रि –** कुण्ठिता अश्रयः यस्य तत् कुण्ठिताश्रि।

१. श्रियः पाल्यश्रि कोटयः – इत्यमरः।

अथ वरुणदेवस्य दशां वर्णयति –

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।। २१।।

पदच्छेदः :– किम्, च, अयम्, अरिदुर्वारः, पाणौ, पाशः, प्रचेतसः, मन्त्रेण, हतवीर्यस्य, फणिनः, दैन्यम्, आश्रितः।

अन्वयक्रमः :– किञ्च अयम् अरिदुर्वारः प्रचेतसः पाणौ पाशः मन्त्रेण हतवीर्यस्य फणिनः दन्यम् आश्रितः।

प्रतिपदार्थाः :–

किञ्च	= किञ्च
अयम् अरिदुर्वारः	= अयम् शत्रुदुष्प्रधर्षः
प्रचेतसः	= वरुणस्य
पाणौ	= हस्तयोः
पाशः	= रज्जुः (आयुधविशेषः)
मन्त्रेण	= गारुडेन
हतवीर्यस्य	= प्रतिबद्धशक्तेः
फणिनः	= सर्पस्य (इव)
दन्यम्	= शोच्यत्वम्
आश्रितः।	= प्राप्तः।

भावः :– किन्तु पुरोदृश्यमानः शतॄणां संहारकः वरुणदेवस्य हस्तयोः अलङ्कृतः अयं पाशः गारुडमन्त्रेण तेजोविहीनं प्राप्य, सर्पवत् दैन्यत्वं गच्छति।

विशेषांशाः :– १. अरिदुर्वारः – दुःखेन वारयितुं शक्यः दुर्वारः अरीणां दुर्वारः अरिदुर्वारः।

२.प्रचेतसः – प्रकृष्टं चेतः यस्य सः प्रचेतः, तस्य प्रचेतसः। **३. हतवीर्यस्य –** हतं वीर्यं यस्य सः हतवीर्यः तस्य हतवीर्यस्य। **४. फणिनः –** फणाः सन्ति अस्य इति फणी, तस्य फणिनः। **५. दैन्यम् –** दीनस्य भावः दैन्यम्।

१. **प्रचेता वरुणः पाशी** इत्यमरः।

२. फणिनिष्ठदैन्यस्य पाशेऽसम्भवात् दैन्यमिव दैन्यम् इति कल्पनात् असम्भवद्वस्तुसम्बन्धः निदर्शनालङ्कारः।

अथ कुबेरस्य दशां वर्णयति –

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः।। २२।।

पदच्छेदः :– कुबेरस्य, मनःशल्यम्, शंसति + इव, पराभवम्, अपविद्धगदः, बाहुः, भग्नशाखः, इव, द्रुमः।

अन्वयक्रमः :– अपविद्धगदः भग्नशाखः द्रुमः इव स्थितः कुबेरस्य बाहुः मनःशल्यं पराभवं शंसति इव ।

प्रतिपदार्थाः :–

अपविद्धगदः	= त्यक्तगदः
भग्नशाखः	= नष्टशाखः
द्रुमः इव	= वृक्ष इव
स्थितः	= संस्थितः
कुबेरस्य	= कुबेरस्य
बाहुः	= हस्तः
मनःशल्यं	= मनःक्षीणत्वम् (दुःखहेतुत्वम्
पराभवं	= अपमानम् (शत्रुकृतम्)
शंसति इव।	= कथयति इव (अनुमापयति) ।

भावः :– गदाविहीनस्य कुबेरस्य हस्तः कर्तितशाखाद्रुम इव मानसिकं क्षीणत्वं तस्य शत्रुकृतं

पराभवं सूचयति।

विशेषांशाः :– १. अपविद्धगदः – अपविद्धा गदा येन सः अपविद्धगदः । **२.भग्नशाखः –** भग्नाः शाखाः यस्य सः भग्नशाखः । **३. द्रुमः –** द्रुतः शाखा अस्ति यस्य सः द्रुमः । **४. कुबेरस्य –** कुत्सितं वैरं यस्य सः कुबेरः, तस्य कुबेरस्य। **५. मनः शल्यम् –** मनसः शल्यं तत् मनःशल्यम्।

१. चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः – इत्यमरः।

२. बाहौ मुख्यकथनस्य असम्भवात् इवशब्दोऽपि अत एव (निदर्शनालङ्कारज्ञापनाय एव) ।

यमराजस्य अवस्थामाह –

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।। २३।।

पदच्छेदः :– यमः, अपि, विलिखन्, भूमिम्, दण्डेन, + अस्तमितत्विषा, कुरुते, अस्मिन्, अमोघे, अपि, निर्वाण+अलातलाघवम्।

अन्वयक्रमः :– अस्तमितत्विषा दण्डेन यमः अपि भूमिं विलिखन् अमोघे अपि अस्मिन् निर्वाणालातलाघवं कुरुते।

प्रतिपदार्थाः :–

अस्तमितत्विषा	= निस्तेजस्केन
दण्डेन	= दण्डेन
यमः अपि	= यमधर्मराजः अपि
भूमिं	= पृथिवीम्
विलिखन्	= आलिखन्
अमोघे अपि	= सफले अपि
अस्मिन्	= अस्मिन् दण्डे
(निर्वाण+अलातलाघवम्	=)
निर्वाण+अलातस्य	= शान्तोल्मुकस्य
(अलातम्	= भूलेखनशलाका)
लाघवम्	= उल्मुकस्य लाघवम् इव लाघवम्
कुरुते।	= चेष्टते।

भावः :– यमधर्मराजोऽपि अस्तमिततेजसा स्वदण्डेन पृथिव्यां आलिखन् शान्तोल्मुक इव अस्य निष्क्रियता क्लैब्यं प्रकटयति।

विशेषांशाः :– १. अस्तमितत्विषा – अस्तमिताः त्विषः यस्य सः तेन अस्तमितत्विषा। **२.अमोघे –** न मोघः अमोघः, तस्मिन् अमोघे। **३. विलिखन् –** विलिखति इति विलिखन्। **४.निर्वाणालातलाघवम् –** निर्वाणं च तत् आलातं च निर्वाणालातम्। लघोर्भावः लाघवम्। निर्वाणालातस्य लाघवं निर्वाणालातलाघवम्।

१. अलातम् उल्मुकं ज्ञेयम् – इति हलायुधः। **आलातमुल्ककं ज्ञेयम्** इत्यमरः।

द्वादशानाम् आदित्यानाम् अवस्थामाह–

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्।। २४।।

पदच्छेदः :– अमी, च, कथम्, आदित्याः, प्रतापक्षतिशीतलाः, चित्रन्यस्ता इव गताः प्रकाम+आलोकनीयताम्, गताः।

अन्वयक्रमः :– प्रतापक्षतिशीतला अमी आदित्याः च कथं चित्रन्यस्ता इव प्रकामालोकनीयतां गताः?

प्रतिपदार्थाः :–

प्रतापक्षतिशीतला	–
प्रतापक्षत्या	= तेजसां क्षयेण
शीतला	= शीततां प्राप्ताः
अमी आदित्याः च	= एते द्वादश आदित्याः च
कथं	= केन हेतुना ?
चित्रन्यस्ताः इव	= चित्रलिखिताः इव
प्रकामम्	= अत्यन्तम्
आलोकनीयतां	= दृश्यतां
गताः	= प्राप्ताः

भावः :– तेजसां क्षयेण अत्यन्तं शीतलाः सञ्जाताः एते द्वादश आदित्याः, चित्रलिखिताः

आदित्याः इव नेत्रदर्शनं विदधाति केन हेतुना ?

विशेषांशाः :– १. प्रतापक्षतिशीतलाः – प्रकृष्टस्तापः प्रतापः प्रतापस्य क्षतिः प्रतापक्षतिः तया शीतलाः प्रतापक्षतिशीतलाः। **२. आदित्याः –** अदितेरपत्यानि पुमांसः आदित्याः। **३.चित्रन्यस्ताः –** चित्रे न्यस्ताः चित्रन्यस्ताः। **४.प्रकामालोकनीयताम् –** आलोकयितुं योग्यः आलोकनीयः आलोकनीयस्य भावः आलोकनीयता। प्रकामं आलोकनीयता प्रकामालोकनीयता तां प्रकामालोकनीयताम्।

१. आलेख्य–आश्चर्ययोः चित्रम् – इत्यमरः।

अथ इदानीं मरुताम् अवस्थामाह–

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते।
अम्भसामोघसंरोधः प्रतीपगमनादिव।। २५।।

पदच्छेदः :– परि + आकुलत्वात्, मरुताम्, वेगभङ्गः, अनुमीयते, अम्भसाम्, ओघसंरोधः, प्रतीपगमनात् + इव।

अन्वयक्रमः :– मरुतां पर्याकुलत्वात् वेगभङ्गः अम्भसां प्रतीपगमनात् ओघसंरोधः इव अनुमीयते।

प्रतिपदार्थाः :–

मरुताम्	= वायूनाम् सप्तसप्तानाम्
पर्याकुलत्वात्	= स्खलितगतित्वात् हेतोः
वेगभङ्गः	= वेगस्य भङ्गः
अम्भसाम्	= जलानाम्
प्रतीपगमनात्	= उत्तान–अवरोधात्
ओघसंरोधः इव	= प्रवाहप्रतिबन्धः इव
अनुमीयते।	= प्रतिभाति।

भावः :– एतेषां वायूनाम् वेगव्याकुलता कारणेन एवं भग्नत्वं दृश्यते यथा उच्चप्रदेशस्य अवरोधेन जलप्रवाहः स्थगितो भूत्वा, प्रतीपं प्रवहति तद्वत्।

विशेषांशाः :– १. पर्याकुलत्वात् – पर्याकुलानां भावः पर्याकुलत्वं तस्मात् पर्याकुलत्वात्। **२.वेगभङ्गः –** वेगस्य भङ्गः वेगभङ्गः। **३.प्रतीपगमनात् –** प्रतीपं च तद्गमनं प्रतीपगमनं तस्मात् प्रतीपगमनात्। **४.ओघसंरोधः –** ओघस्य संरोधः ओघसंरोधः।

१. समीरमारुतमरुज्जगत्प्राणसमीरणा – इत्यमरः। ते च अष्टौ भवन्ति। तथा च स्मृतिः –

गगनः स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः।।

२. अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् – इत्यमरः।

अथ एकादशरुद्राणाम् अवस्थामाह–

आवर्जितजटामौलिविलम्बिशशिकोटयः।
रुद्राणामपि मूर्धानः क्षतहुंकारशंसिनः।। २६।।

पदच्छेदः :– आवर्जितजटामौलिविलम्बिशशिकोटयः, रुद्राणाम्, अपि, मूर्धानः, क्षतहुङ्कारशंसिनः।

अन्वयक्रमः :– आवर्जितजटामौलिविलम्बिशशिकोटयः रुद्राणाम् अपि, मूर्धानः, क्षतहुङ्कारशंसिनः (दृश्यते)।

प्रतिपदार्थाः :–

आवर्जितजटामौलिविलम्बिशशिकोटयः,

आवर्जितेषु	= परिभवदुःखावनम्रेषु
जटानाम् मौलिषु	= जटाजूटेषु
वलम्बिन्यः	= स्रंसिन्यः
शशिकोटयः	= चन्द्ररेखाः
रुद्राणाम् अपि	= एकादशानाम् रुद्राणाम् अपि
मूर्धानः	= शिरसः उपरिभागे
क्षतहुङ्कारशंसिनः	= हुङ्कारक्षति–अनुमापकाः

(दृश्यते)।

भावः :– पराजयजन्येन अवनतजटाजूटेषु मूर्धनि चन्द्रकिरणान् लम्बयन्तः एते एकादश रुद्राः अपि स्वकीयहुङ्कारनाशं सूचयन्ति।

विशेषांशाः :– १. आवर्जितजटामौलिविलम्बिशशिकोटयः – जटानां मौलयः जटामौलयः। आवर्जिताश्च जटामौलयः आवर्जितजटामौलयः, तेषु विलम्बन्ते इति आवर्जितजटामौलिविलम्बिन्यः। शशः अस्य अस्ति इति शशी। शशिनः कोटयः शशिकोटयः। आवर्जितजटामौलिविलम्बिन्यः शशिकोटयः येषां ते – आवर्जितजटामौलिविलम्बिशशिकोटयः। **२. क्षतहुङ्कारशंसिनः** – क्षतश्चासौ हुङ्कारः क्षतहुङ्कारः, तं शंसन्ति इति क्षतहुङ्कारशंसिनः।

१. शिरः शीर्षं मूर्धाना मस्तकोऽश्रियम् – इत्यमरः।

एवं मुखविकृत्यादीनां हेतुं स्वयमेवमाह –

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः।। २७।।

पदच्छेदः :– लब्धप्रतिष्ठाः, प्रथमम्, यूयम्, किम्, बलवत्तरैः, अपवादैः, इव + उत्सर्गाः, कृतव्यावृत्तयः, परैः।

अन्वयक्रमः :– प्रथमं लब्धप्रतिष्ठा यूयं बलवत्तरैः परैः उत्सर्गाः अपवादैः इव किं कृतव्यावृत्तयः (भवथ)।

प्रतिपदार्थाः :–

प्रथमम्	= पूर्वम्
लब्धप्रतिष्ठाः	= लब्धस्थितयः, लब्धावकाशाः
यूयं	= भवन्तः
बलवत्तरैः	= पौरुषातिरेकात् प्रबलतरैः, निरवकाशैः
परैः	= शत्रुभिः
उत्सर्गाः	= सामान्यशास्त्राणि (**मा हिंस्यात्** – इत्यादीनि)
अपवादैः इव	= **गाम् आलभेत** इत्यादिभिः विशेषशास्त्रैः इव
किं कृतव्यावृत्तयः	= किंकर्तव्यतामूढाः, कृतविषयसङ्कोचरूपबाधाः
(भवथ)।	= यूयं स्थ।

भावः :– लब्धावकाशानि **मा हिंस्यात् सर्वभूतानि** इत्येवमादीनि सामान्यशास्त्राणि, **अग्नीषोमीयं पशुमालभेत** इत्येवमादिभिः वैदिकापवादशास्त्रैः (निरवकाशैः विशेषशास्त्रैः) बाधितत्वात् सङ्कुचितमनस्काः इव भवन्तः देवाः उत्सर्गशास्त्रवत् प्रथमं लब्धप्रतिष्ठाः, तदनन्तरं प्रबलशत्रुभिः (अपवादशास्त्रैः) पीडितत्वात् – (भवन्तः) कृतप्रतिष्ठाभङ्गाः सञ्जाताः किम् इति। (तस्य प्रतिष्ठां त्यक्तवन्तो वा ?)

विशेषांशाः :– १. लब्धप्रतिष्ठाः – लब्धाः प्रतिष्ठाः यैः ते **लब्धप्रतिष्ठाः । २. बलवत्तरैः –** प्रशस्तं बलं येषां ते बलवन्तः। अतिशयेन बलवन्तः बलवत्तराः, तैः बलवत्तरैः। **३. अपवादैः –** अपोद्यन्ते इति अपवादाः, तैः अपवादैः। **४. कृतव्याकृतयः –** कृताव्याकृतिः येषां ते कृतव्याकृतयः।

सामान्यशास्त्रम् (उत्सर्गशास्त्रम्)	– लब्धावकाशम्	– दुर्बलो भवति।
विशेषशास्त्रम् (अपवादशास्त्रम्)	– निरवकाशम्	– प्रबलः भवति।

१. सावकाश–निरवकाशयोः निरवकाशविधिर्बलियान् – इति न्यायः। २. सावकाशत्वम् उत्सर्गत्वम्, निरवकाशत्वम् अपवादत्वम् इति वैयाकरणानां सिद्धान्तः। यथा **कर्मण्यण्** (पा.सू. ३.२.१) इत्यस्य उत्सर्गस्य, **आतोऽनुपसर्गे कः** (पा.सू. ३.२.३) इति अपवादः। निषेधशास्त्रस्य अवैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थापनाद्विषयसंकोचः।

अथ तत्र कर्तव्यांशं पृच्छन् स्ववचनम् उपसंहरति –

तद्ब्रूत वत्साः! किमितः प्रार्थयध्वं समागताः।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता।। २८।।

पदच्छेदः :– तत् + ब्रूत, वत्साः, किम्, इतः, प्रार्थयध्वम्, समागताः, मयि, सृष्टिः, हि, लोकानाम्, रक्षा, युष्मासु + अवस्थिता।

अन्वयक्रमः :– तत् हे वत्साः! समागताः यूयम् इतः किं प्रार्थयध्वम्। ब्रूत हि मयि लोकानां सृष्टिः रक्षा युष्मासु अवस्थिता।

प्रतिपदार्थाः :–

तत्	= तस्मात् कारणात्
हे वत्साः!	= हे पुत्रकाः! (स्वयं पितामहत्वात् वत्साः इति आमन्त्रयते।)
समागताः	= सम्भूय आगताः (यूयम्)
इतः	= मत्तः
किं प्रार्थयध्वम्	= किम् इच्छथ
ब्रूत हि	= कथयत
मयि	= ब्रह्मणि मयि
लोकानां	= समस्तलोकानाम्

सृष्टिः	= सर्जनकर्म (अवस्थिता।)
रक्षा	= एतेषां लोकानां रक्षणभारः
युष्मासु	= भवत्सु
अवस्थिता।	= संस्थापिता। (अतः लोकसंरक्षणार्थं मदपेक्षा नास्ति।)

भावः :– अतः सम्भूय आगताः हे वत्साः! यूयं वदथ मत्तः किं इच्छथ? यतः सृष्टिनिर्माणकार्यभारः मयि संस्थापितः। किन्तु निर्मितसृष्टेः संरक्षणकार्यभारः युष्मासु एव संस्थापितः। अतश्च मदपेक्षा नास्ति।

विशेषांशाः :– १. समागताः – सम्भूय आगताः समागताः। **२. इतः –** अस्मात् इति इतः।

१. वत्सस्तु अर्भक–पुत्राद्योः वर्षे वत्सं तु वक्षसि इति विश्वः।

अथ ब्रह्मणो वचनानन्तरं प्रत्युत्तरप्रदाने बृहस्पतेः तद्योग्यत्वम् इन्द्रस्य तन्नियोगमाह–

ततो मन्दानिलोद्धृतकमलाकरशोभिना।
गुरुं नेत्रसहस्रेण नोदयामास वासवः।। २९।।

पदच्छेदः :– ततः, मन्द+अनिल+उद्धृतकमलाकरशोभिना, गुरुम्, नेत्रसहस्रेण, नोदयामास वासवः।

अन्वयक्रमः :– ततः वासवः गुरुं मन्दानिलोद्धृतकमलाकरशोभिना नेत्रसहस्रेण नोदयामास।

प्रतिपदार्थाः :–

ततः	= भगवत्प्रश्नानन्तरम्
वासवः	= इन्द्रः
गुरुम्	= बृहस्पतिम्
मन्दानिलोद्धृतकमलाकरशोभिना	= मन्दमन्दवायोः प्रेरणया शोभितेन कमलाकरेण इव
नेत्रसहस्रेण	= सहस्रनेत्रैः

नोदयामास। = प्रेरयामास। (चोदयामास।)

भावः :– एवं पितामहस्य वचनं श्रुत्वा, अनन्तरं मन्दमन्दवायोः प्रेरणया शोभितकमलसमूहानां इव सुशोभितनेत्रैः इन्द्रः गुरुं बृहस्पतिम् वक्तुं अवकाशो दत्तवान्।

विशेषांशाः :– १. गुरुम् – गृणाति उपदेशं ददाति इति गुरुः, तं गुरुम्। **२. मन्दानिलोद्धूत–कमलाकरशोभिना –** मन्दश्च असौ अनिलः मन्दानिलः। मन्दानिलेन उद्धूतः मन्दानिलोद्धूतः। कमलानाम् आकरः कमलाकरः, कमलाकर इव शोभिते इति मन्दानिलोद्धूतकमलाकरशोभि, तेन मन्दानिलोद्धूतकमलाकरशोभिना। **३. नेत्रसहस्रेण –** नेत्राणां सहस्रं नेत्रसहस्रं तेन नेत्रसहस्रेण।

१. बृहस्पतिः सुराचार्यः गीष्पतिः धिषणो गुरुः इत्यमरः। **२. वासवो वृत्रहा वृषा** इत्यमरः। **३.लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी** इत्यमरः।

अथ इदानीं बृहस्पतेः प्रतिवचनप्रस्तावमाह–

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम्।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्।। ३०।।

पदच्छेदः :– सः, द्विनेत्रम्, हरेः, चक्षुः, सहस्रनयनाधिकम्, वाचस्पतिः, उवाच + इदम्, प्राञ्जलिः, जलजासनम्।

अन्वयक्रमः :– हरेः सहस्रनयनाधिकं द्विनेत्रं चक्षुः सः वाचस्पतिः प्राञ्जलिः सन् जलजासनम् इदम् उवाच।

प्रतिपदार्थाः :–

हरेः	= महेन्द्रस्य
सहस्रनयनाधिकं	= सहस्रनेत्रात् अतिरक्तं
द्विनेत्रं	= द्विलोचनम्
चक्षुः	= नेत्रभूतः
सः वाचस्पतिः	= वाचस्पतिः
प्राञ्जलिः सन्	= बद्धाञ्जलिः सन्

जलजासनम्	= ब्रह्मणम्
इदम्	= इदं वक्ष्यमाणं वचः
उवाच।	= अब्रवीत्।

भावः :– इन्द्रस्य सहस्रनेत्रापेक्षया विशिष्टद्विनेत्रात्मकः सः बृहस्पतिः अञ्जलिं बद्ध्वा ब्रह्माणम् इदं वक्ष्यमाणं वचः जगाद।

विशेषांशाः :– १. सहस्रनमनाधिकम् – सहस्राभ्य नयनेभ्यः अधिकं सहस्रनयनाधिकम्। **२.द्विनेत्रम् –** धर्मदृष्टिः चेति। द्वे नेत्रे यस्य तत् द्विनेत्रम्। **३. बृहस्पतिः –** बृहतः पतिः बृहस्पतिः। **४.जलजासनम् –** जले जातं जलजम्, जलजम् आसनम् यस्य सः – जलजासनम्।

१. इन्द्रो दुश्च्यवनो हरिः इति हलायुधः। **२. जीवः अङ्गिरसो वाचस्पतिः** इत्यमरः।

अथ बृहस्पतेः प्रतिवचनप्रकारम् आह –

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम्।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो! ।। ३१।।

पदच्छेदः :– एवम्, यत् + आत्थ, भगवन्, आमृष्टम्, नः, परैः, पदम्, प्रत्येकम्, विनियुक्त + आत्मा, कथम्, न, ज्ञास्यसि, प्रभो!।

अन्वयक्रमः :– भगवन्! यद् आत्थ तत् एवम्। नः पदं परैः आमृष्टम्। प्रभो प्रत्येकं विनियुक्तात्मा त्वं कथं न ज्ञास्यसि ?

प्रतिपदार्थाः :–

भगवन्!	= हे षड्गुणैश्वर्यसम्पन्न !
यद् आत्थ	= कृतव्यावृत्तयः परः इति यत् ब्रवीषि।
तत् एवम्।	= सत्यम्
नः पदं	= अस्माकं देवानाम् अधिकारः/स्थानम्
परैः	= शत्रुभिः असुरैः
आमृष्टम्।	= आक्षिप्तम्।
प्रभो	= हे स्वामिन्
प्रत्येकं	= प्रतिपुरुषम्
विनियुक्तात्मा	= व्यवस्थितस्वरूपः
त्वं	= भवान्
कथं	= केन प्रकारेण

न ज्ञास्यसि ? = न जानासि।

भावः :–हे भगवन् त्वं यद् ब्रवीषि तत् सत्यमस्ति। अस्माकं स्थानं शत्रुभिः आक्रान्तम्। हे प्रभो! सर्वान्तर्यामितया विश्वव्यापी भवान् किं न लोकवृत्तन्तं जानाति।

विशेषांशाः :– १.प्रत्येकम् – एकम् एकं प्रति – प्रत्येकम्। **२.विनियुक्तात्मा –** विनियुक्तः आत्मा यस्य सः – विनियुक्तात्मा। **३. भगवान् –** भगः अस्तीति भगवान्। विष्णुपुराणे च उक्तम् –

ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतिरिणा।। इति।

१. भग–श्री–काम–माहात्म्य–वीर्य–यत्नार्ककीर्तिषु इत्यमरः। **२. अभिघात परा एति प्रत्यर्थि परिपन्थिनः** इति, **प्रभुः परिवृढोऽधिपः** इति चामरः।

अथ स्वाधिकारोपप्लवहेतुभूतं तारकासुरं निर्दिशति –

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः।। ३२।।

पदच्छेदः :– भवत् + लब्धवर + उदीर्णः, + तारक + आख्यः, महासुरः, उपप्लवाय, लोकानाम्, धूमकेतुः, इव, उत्थितः।

अन्वयक्रमः :– हे भगवन्! भवल्लब्धवरोदीर्णः तारकाख्यः महासुरः धूमकेतुः इव लोकानाम् उपप्लवाय उत्थितः।

प्रतिपदार्थाः :–

हे भगवन्!	= हे स्वामिन् !
भवल्लब्धवरोदीर्णः	= त्वत्तः लब्धेन वरेण उद्धतः
तारकाख्यः	= तारकासुर इति नामधेयः
महासुरः	= दानवः
धूमकेतुः इव	= उत्पातग्रहविशेषः इव
लोकानाम्	= जनानां
उपप्लवाय	= उपद्रवाय
उत्थितः।	= उत्पन्नः अस्ति।

भावः :– हे भगवन् ! भवतः सकाशात् वरं लब्ध्वा महादानवः तारकासुरः उद्धतो भूत्वा सकललोकानां विनाशाय धूमकेतुनक्षत्र इवोत्पन्नः अस्ति।

विशेषांशाः :– १. भवल्लब्धवरोदीर्णः – भवतः लब्धः – भवल्लब्धः। भवल्लब्धः च असौ वरः चासौ भवल्लब्धवरः तेन – भवल्लब्धवरेण। भवल्लब्धवरेण उदीर्णः – भवल्लब्धवरोदीर्णः। **२.तारकाख्यः** – तारक इति आख्या यस्य सः – तारकाख्यः। **३. महासुरः** – महान् चासौ असुरः च – महासुरः। **४. धूमकेतुः** – धूमाकारः केतुः धूमकेतुः। गर्गसंहितायाम् धूमकेतोः उदयेन अनर्थप्रतिपादकत्वम् उक्तम् –

उत्तिष्ठति यदा भीमो धूमकेतुर्नभस्तले।
तदा विनश्यति क्षिप्रं जगदेतच्चराचरम्।। इति।

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः इत्यमरः। **देवात् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक् प्रिये** – इति, **आख्याह्वे अभिधानं च नामधेयं च नाम च** इति चामरः। **त्रिष्वथो जगती लोको विष्टपं भवनं जगत्** इति। **अग्न्युत्पातो धूमकेतू** इति चामरः।

अथ सूर्यस्य अनुवृत्तिमाह–

पुरे तावन्तमेवास्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते।। ३३।।

पदच्छेदः :– पुरे, तावन्तम्, एव + अस्य, तनोति, रविः, + आतपम्। दीर्घिकाकमल + उन्मेषः, यावत् + मात्रेण, साध्यते।

अन्वयक्रमः :– अस्य पुरे रविः तावन्तम् एव आतपं तनोति। यावन्मात्रेण दीर्घिकाकमलोन्मेषः साध्यते।

प्रतिपदार्थाः :–

अस्य	= तारकासुरस्य
पुरे	= नगरे
रविः	= भानुः/सूर्यः
तावन्तम् एव	= तावन्मात्रम् एव
आतपं	= औष्ण्यम्/घर्मम्
तनोति।	= विस्तारयति
यावन्मात्रेण	= यावता
दीर्घिकाकमलोन्मेषः	= क्रीडावापीपद्मनां विकासः
साध्यते।	= निष्पाद्यते।

भावः :– सूर्यः तारकासुरनगरे यावन्मात्रेण आतपेन वापीपद्मविकासः भवति तावन्मात्रमल्प–परिमाणमेव आतपं प्रसारयति। तीक्ष्णकिरणोऽपि सूर्यः तस्य तारकासुरस्य भीत्या तत्पुरे मन्दोष्णः सन् प्रकाशते।

विशेषांशाः :– १. तावन्तम् – तत्परिमाणम् अस्य तावान्, तं तावन्तम्। **२. यावन्मात्रेण** – यावती मात्रा यस्य सः यावन्मात्रः, तेन यावन्मात्रेण। **३. दीर्घिकाकमलोन्मेषः** – कमलानाम् उन्मेषः कमलोन्मेषः। दीर्घिकासु कमलोन्मेषः दीर्घिकाकमलोन्मेषः।

तावान् – तावन्तौ – तावन्तः। – प्रथमाविभक्तिः
तावन्तम् – तावन्तौ तावतः। – द्वितीयाविभक्तिः

१. भानुर्हंसः सहस्रांशुस्तपनः सविता रविः इत्यमरः। **२. अल्पे परिमाणे सा मात्रं कात्स्र्याविधारणे** इत्यमरः। **३. वापी तु दीर्घिका** इत्यमरः।

अथ चन्द्रस्य अनुवर्तनम् आह–

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम्।। ३४।।

पदच्छेदः :– सर्वाभिः, सर्वदा, चन्द्रः, + तम्, कलाभिः, + निषेवते, न, + आदत्ते, केवलाम्, लेखाम्, हरचूडामणीकृताम्।

अन्वयक्रमः :– चन्द्रः तं सर्वदा सर्वाभिः कलाभिः निषेवते केवलां हरचूडामणिकृतां लेखां न आदत्ते।

प्रतिपदार्थाः :–

चन्द्रः	= चन्द्रमाः
तं	= तारकासुरं
सर्वदा	= सर्वस्मिन् काले (कृष्णपक्षेऽपि)
सर्वाभिः कलाभिः	= षोडशभागैः

निषेवते	= आश्रयते
केवलाम्	= एकाम्
हरचूडामणिकृताम्	= शिवशिरोभूषणीभूताम्
लेखाम्	= कलाम्
न आदत्ते।	= न गृह्णाति।

भावः :– चन्द्रमाः कृष्णपक्षेऽपि षोडशभिः परिपूर्णः सन् तारकासुरं सेवते केवलां शङ्करशिरसि वर्तमानां कलां न स्वीकरोति।

विशेषांशाः :– १. हरचूडामणीकृताम् – न चूडामणिः अचूडामणिः। अचूडामणिः चूडामणिः यथा सम्पद्यते तथा कृता चूडामणीकृता। हरस्य चूडामणीकृता – हरचूडामणीकृता। तां हरचूडामणिकृताम्।

१. **हिमांशुश्चन्द्रमाश्चन्द्रः इन्दुः कुमुदबान्धवः** इत्यमरः।

अथ वायोः अनुसरणम् आह–

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात्।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्।। ३५।।

पदच्छेदः :– व्यावृत्तगतिः, + उद्याने, कुसुमस्तेयसाध्वसात्, न, वाति, वायुः, तत्पार्श्वे, तालवृन्तानिलाधिकम्।

अन्वयक्रमः :– वायुः कुसुमस्तेयसाध्वसात् उद्याने व्यावृत्तगतिः सन् तत्पार्श्वे तालवृन्तानिलाधिकं न वाति।

प्रतिपदार्थाः :–

वायुः	= वायुदेवः/ वातरिश्वा
कुसुमस्तेयसाध्वसात्	= सुमनसः चौर्यभयात्
उद्याने	= आरामे
व्यावृत्तगतिः सन्	= निवृत्तगमनः सन्
तत्पार्श्वे	= तत्समीपे
तालवृन्तानिलाधिकं	=व्यजनवातादिकं यथा स्यात् तथा
न वाति।	= न वहति।

भावः :– वायुदेवः तारकासुरस्य उद्याने अकारणतया यस्य कस्यापि पुष्पस्य पातः न भवेत् इत्यतः तारकासुरेण भयसन्त्रस्तः सन् तस्य समीपे व्यजनपवनात् अधिकं वायुः न वाति।

विशेषांशाः :–१. **वायुः** – वाति इति वायुः। २. **कुसुमस्तेयसाध्वसात्** – स्तेनस्य भावः कर्म वा स्तेयम्, कुसुमानां स्तेयं – कुसुमस्तेयम्, तस्मात् कुसुमस्तेयात् ; कुसुमस्तेयात् साध्वसम् – कुसुमस्तेयसाध्वसात्। ३. **व्यावृत्तगतिः** – व्यावृत्ता गतिः यस्य सः व्यावृत्तगतिः। ४. **तत्पार्श्वे** – तस्य पार्श्वम्, तत्पर्श्वम् ; तस्मिन् तत्पार्श्वे। ५. **तालवृन्तानिलाधिकम्** – तालवृन्तस्य अनिलः तालवृन्तानिलः; तस्मात् अधिकम् – तालवृन्तानिलाधिकम्।

१. श्वसनः स्पर्शनो वायुः मातरिश्वा सदागतिः – इति अमरः। **२. चौरिका–स्तैन्य–चौर्यं च स्तेयम्** इति, **चौरिकागारिकस्तेन दस्युतस्करमोषका** इति चामरः। **३. स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्** इत्यमरः। **४. भीतिर्भीः साध्वसं भयम्** इत्यमरः। **५. व्यजनं तालवृन्तम्** इत्यप्यमरसिंहः। **६. पृषदश्वः गन्धवहो गन्धवाहानिलासुराः** इत्यमरः।

अथ षण्णाम् ऋतूनाम् अनुवृत्तिमाह–

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते।। ३६।।

पदच्छेदः :– पर्यायसेवाम्, उत्सृज्य, पुष्पसम्भारतत्पराः, उद्यानपालसामान्यम्, तम्, ऋतवः उपासते।

अन्वयक्रमः :– ऋतवः पर्यायसेवाम् उत्सृज्य पुष्पसम्भारतत्पराः सन्तः उद्यानपालसामान्यम्, तम् उपासते।

प्रतिपदार्थाः :–

ऋतवः	= वसन्तादि षड् ऋतवः
पर्यायसेवाम्	= क्रमिकशुश्रूषाम्
उत्सृज्य	= त्यक्त्वा
पुष्पसम्भारतत्पराः सन्तः	= सुमनसङ्ग्रहासक्ताः सन्तः
उद्यानपालसामान्यम्	= आरामरक्षकसाधारणम् यथा स्यात् तथा
तम्	= तारकासुरम्

उपासते।	= सेवन्ते।

भावः :– शीतलं उष्णादिकं च स्वं स्वं गुणं (धर्मं) परित्यज्य उद्यानपालकवत् सुमनसां सम्पादनतत्पराः वसन्तादयः षड्ऋतवः अन्यतमस्य ऋतोः पुष्पं न नाशयन्ति। अर्थात् एकदैव ते ऋतवः तारकासुरम् आराधयन्ति इति भावः।

विशेषांशाः :– क्रमेण षड् ऋतवः –

वसन्तश्च तथा ग्रीष्मः प्रवृट् च शरदेव च।
हेमन्त शिशिरश्चैव षडेते ऋतवः स्मृताः।।

१. पर्यायसेवाम् – पर्यायेण सेवा पर्यायसेवा, ताम् **पर्यायसेवाम्। २. पुष्पसम्भारतत्पराः –** पुष्पाणां सम्भारः पुष्पसम्भारः, तस्मिन् पुष्पसम्भारे। पुष्पसम्भारे तत्पराः पुष्पसम्भारतत्पराः। **३. उद्यानपालसामान्यम्** – उद्यानं पालयन्ति इति उद्यानपालाः तैः सामान्यं यथा स्यात् तथा – उद्यानपालसामान्यम्। ४. **साधारणं तु सामान्यम्** इत्यमरः।

समुद्रस्य आनुकूल्यम् आह–

तस्योपायनयोग्यानि रत्नानि सरितां पतिः।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते।। ३७।।

पदच्छेदः :– तस्य, + उपायनयोग्यानि, रत्नानि, सरिताम्, पतिः, कथम्, अपि, + अम्भसाम्, अन्तः, + आनिष्पत्तेः, प्रतीक्षते।

अन्वयक्रमः :– सरितां पतिः तस्य उपायनयोग्यानि रत्नानि अम्भसाम् अन्तः आनिष्पत्तेः कथम् अपि प्रतीक्षते।

प्रतिपदार्थाः :–

सरितां पतिः	= समुद्रः
तस्य	= तारकासुरस्य
उपायनयोग्यानि	= उपहारयोग्यानि
रत्नानि	= मणीन्
अम्भसाम्	= अम्बूनाम्
अन्तः	= मध्ये

आनिष्पत्तेः	= परिपाकपर्यन्तं
कथम् अपि	= महत्ता प्रयत्नेन
प्रतीक्षते।	= प्रतिपालयति।

भावः :– १. सागरः समस्तश्रेष्ठरत्नानां तारकोपायनयोग्तयत्वात् तदिररत्नप्रदाने दण्डमाशङ्क्य स्वजलमध्ये तेषां रत्नानां कालवशात् परिपाकपूर्वकं तदुपायनयोग्यताप्राप्तिपर्यन्तं तारकसेवायाः कालविलम्बम् आशङ्क्यमानः यथाकथञ्चित् प्रतीक्षते।

२. समुद्रः तारकासुराय अत्यन्तश्रेष्ठरत्नानाम् उपाहारतया दातुं, जलान्तर्भागे परिपाकदशायै अपेक्षितं कालं प्रतीक्षमाणः तारकासुरभयात् यथाकथञ्चित् तादृक् समयं यापयति।

विशेषांशाः :– १. श्रूयते हि – **'शुक्तिकायां पतितः स्वातिनक्षत्रजलबिन्दोः षण्मासोत्तरमुद्गीर्णः प्रशस्तं मौक्तिकं भवति'** इति। २. उपायनयोग्यानि – उपायनानां योग्यानि उपायनयोग्यानि, तानि उपायनयोग्यानि। ३. **उपायनमुपग्राह्यमुपहारस्तथोपद** इति, ४. **अम्भोस्तोय–पानीय–नीर–क्षीराम्बु–शम्बरम्** इति चामरः। **५. अथ नदी सरित्** इति ईश्वरः। **६. पतिरीशिता** इति चामरः।

न केवसं भूतलनिवासिनां तदनुवृत्तिः किन्तु पातालतलवर्तिनां वासुकिप्रभृतीनां नागानामपि इत्याह–

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते।। ३८।।

पदच्छेदः :– ज्वलन्मणिशिखाः, + च, + एनम्, वासुकिप्रमुखाः, निशि, स्थिरप्रदीपताम्, एत्य, भुजङ्गाः, परि + उपासते।

अन्वयक्रमः :– ज्वलन्मणिशिखाः वासुकिप्रमुखाः भुजङ्गाः च निशि स्थिरप्रदीपताम् एत्य एनं पर्युपासते।

प्रतिपदार्थाः :–

ज्वलन्मणिशिखाः	= देदीप्यमानफणामणिज्वालाः
वासुकिप्रमुखाः	= वासुकिप्रधानाः
भुजङ्गाः च	= सर्पाः अपि
निशि	= रात्रौ
स्थिरप्रदीपताम्	= अनिवार्यदीपताम्

एत्य	= प्राप्य
एनं	= तारकासुरम्
पर्युपासते।	= सेवन्ते।

भावः :– १. रात्रौ वासुकिप्रभृतयः सर्पाः समुत्क्षिप्तफणामणयः सन्तः तेषु तेषु स्थानेषु स्थित्वा, अनिर्वाणप्रदीपत्वं लब्ध्वा, स्वफणामणिभिः तमो दूरीकुर्वन्तः तारकासुरं सेवन्ते।

२. रात्रिसमयेषु वासुकिप्रमुखाः सर्पाः स्वस्वफणाः उन्नतं कृत्वा प्रत्येकस्मिन् प्रदेशे वायुना यथा निर्वापणं न सम्भवति तथा प्रदीपानि च भूत्वा, फणामणिभिः अन्धकारं दूरीकुर्वन्तः तारकासुरं संसेवन्ते।

विशेषांशाः :– १. ज्वलन्मणिशिखाः – मणीनां शिखाः मणिशिखाः, ज्वलन्त्यः मणिशिखाः येषां ते ज्वलन्मणिशिखाः। **२. वासुकिप्रमुखाः – वासुकिः प्रमुखं येषां ते – वासुकिप्रमुखाः। ३. स्थिरप्रदीपताम् –** स्थिरश्चासौ प्रदीपः स्थिरप्रदीपः। स्थिरप्रदीपस्य भावः – स्थिरप्रदीपता, तां स्थिरप्रदीपताम्।

१. वासुकिस्तु भुजङ्गराड् इत्यमरः। **२. सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः** इत्यमरः। **३. निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा** इत्यमरः।

अथेदानीं त्रैलोक्याधिपतेः इन्द्रस्यापि सविशेषानुवृत्तिमाह–

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः।। ३९।।

पदच्छेदः :– तत्कृत + अनुग्रह + अपेक्षी, तम्, मुहुः, + दूतहारितैः, अनुकूलयति + इन्द्रः, + अपि, कल्पद्रुमविभूषणैः।

अन्वयक्रमः :– इन्द्रः अपि तत्कृतानुग्रहापेक्षी सन् मुहुः दूतहारितैः कल्पद्रुमविभूषणैः तम् अनुकूलयति।

प्रतिपदार्थाः :–

इन्द्रः अपि	= पाकशासनोऽपि
तत्कृतानुग्रहापेक्षी सन्	= तारकासुरविहितप्रसादप्रार्थी सन्
मुहुः	= भूयोभूयः

दूतहारितैः	= दूतप्रापितैः
कल्पद्रुमविभूषणैः	= कल्पपादपपुष्पैः
तम्	= तारकासुरं
अनुकूलयति।	= अनुकूलं करोति।

भावः :– १. त्रैलोक्याधिपतिः इन्द्रोऽपि तारकसुरप्रसादमाकाङ्क्षमाणः सन् प्रतिपदं दूतजनप्रापितैः कल्पद्रुमालङ्करणैः तं तारकासुरम् अनुवर्तते।

२. देवराजा इन्द्रोऽपि तारकासुरस्य प्रसन्नतायै प्रतिक्षणं दूतान् द्वारीकृत्य बहुमूल्यरत्नानि उपाहरतया सम्प्रेष्य, शत्रुभूतं तं तारकासुरं सेवते।

विशेषांशाः :– १. तत्कृतानुग्रहापेक्षी – तेन कृतः तत्कृतः चासौ अनुग्रहः तत् कृतानुग्रहः तं अपेक्षते तच्छीलः तत्कृतानुग्रहापेक्षी। **२. दूतहारितैः –** दूतैः हारितानि दूतहारितानि तैः दूतहारितैः। **३. कल्पद्रुमविभूषणैः –** विशिष्टानि भूषणानि विभूषणानि। कल्पद्रुमाणां विभूषणानि कल्पद्रुमविभूषणानि, तैः कल्पद्रुमविभूषणैः।

१. इन्द्रो मरुत्वान् मघवा विडौजा पाकशासनः इत्यमरः।

एवं सर्वदेवानुवृत्तावपि चराचरविजयिनि तारकासुरे देवैः कृतसेवावैफल्यम् आह–

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः।। ४०।।

पदच्छेदः :– इत्थम्, आराध्यमानः, + अपि, क्लिश्नाति, भुवनत्रयम्, शाम्येत्, प्रत्यपकारेण, न, + उपकारेण, दुर्जनः।

अन्वयक्रमः :– इत्थम् आराध्यमानः अपि सः भुवनत्रयं क्लिश्नाति। (तथा हि) दुर्जनः प्रत्यपकारेण शाम्येत् उपकारेण न (शाम्येत्)।

प्रतिपदार्थाः :–

इत्थम्	= उक्तप्रकारेण
आराध्यमानः अपि	= सेव्यमानोऽपि

सः	= तारकासुरः
भुवनत्रयं	= लोकत्रयम्
क्लिश्नाति।	= पीडयति। (तथा हि)
दुर्जनः	= दुष्टो जनः
प्रत्यपकारेण	= प्रतीकारेण एव
शाम्येत्	= शान्तो भवति।
उपकारेण	= उपकृत्य
न (शाम्येत्)।	= न हि (शान्तो भवति)।

भावः :– उक्तप्रकारेण सूर्य–शशि–महद्–उदधि–नाग–महेन्द्रैः निरन्तरमाराध्यमानोऽपि स तारकासुरः त्रिलोकं पीडयति। यतो हि दुर्जनः प्रत्यपकारेणैव शान्तो भवेत् न तु प्रत्युपकारेण। प्रत्युपकारेण गर्वितो भवति।

विशेषांशाः :– १. भुवनत्रयम् – त्रयोऽवयवा यस्य तत् त्रयम्। भुवनानां त्रयं भुवनत्रयम्। **२. दुर्जनः** – दुष्टः जनः दुर्जनः। **३. प्रत्यपकारेण** – प्रत्यपकारणं प्रत्यपकारः, तेन **प्रत्यपकारेण।**

१. त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् इत्यमरः।

अथ नन्दनवृक्षापहरणमाह –

तेनामरवधूहस्तैः सदयालूनपल्लवाः।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः।। ४१।।

पदच्छेदः :– तेन, + अमरवधूहस्तैः, सदयालूनपल्लवाः, अभिज्ञाः, + छेदपातानाम्, क्रियन्ते, नन्दनद्रुमाः।

अन्वयक्रमः :– तेन अमरवधूहस्तैः सदयालूनपल्लवाः नन्दनद्रुमाः छेदपातानाम् अभिज्ञाः क्रियन्ते।

प्रतिपदार्थाः :–

तेन	= तारकासुरेण
अमरवधूहस्तैः	= देवाङ्गनाकरैः
सदयालूनपल्लवाः	= सकृपछिन्नकिसलयाः

नन्दनद्रुमाः = इन्द्रोपवनवृक्षाः
छेदपातानाम् = द्वैधीकरणपातानां
अभिज्ञाः = ज्ञातारः
क्रियन्ते। = विधीयन्ते।

भावः :– देवाङ्गनाः सुकुमारकरैः कर्णावतंसार्थं (कर्णभूषणार्थं) सदयं त्रोटितकिसलयान् नन्दनवनवृक्षान् तारकासुरः निर्दयया छित्वा पातयति।

विशेषांशाः :– १. अमरवधूहस्तैः – न म्रियन्ते इति अमराः। अमराणां वध्वः अमरवध्वः। अमरवधूनां हस्ताः अमरवधूहस्ताः, तैः – अमरवधूहस्तैः। २. सदयालूनपल्लवाः – दयया सहितं यथा स्यात् तथा सदयम्। सदयम् आलूनाः पल्लवाः येषां ते – सदयालूनपल्लवाः। ३. नन्दनद्रुमाः – नन्दनस्य द्रुमाः नन्दनद्रुमाः। ४. छेदपाताभिज्ञाः – छेदाश्च पाताश्च छेदपाताः तेषाम् अभिज्ञाः छेदपाताभिज्ञाः।

१. **कृपा दयाऽनुकम्पा स्यादनुक्रोश** इत्यमरः।

२. **पल्लवोऽस्त्री किसलयम्** इत्यमरः।

३. **अनोकहः कुटः सालः पलाशो द्रुमागमः** इति चामरः।

देवानां दारापहरणम् आह–

वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः।
चामरैः सुरबन्दीनां बाष्पसीकरवर्षिभिः।। ४२।।

पदच्छेदः :– वीज्यते, सः, हि, संसुप्तः, श्वाससाधारण+अनिलैः, चामरैः, सुरबन्दीनाम्, बाष्पसीकरवर्षिभिः।

अन्वयक्रमः :– हि यतः सः संसुप्तः सन् श्वाससाधारणानिलैः बाष्पसीकरवर्षिभिः सुरबन्दीनां चामरैः वीज्यते।

प्रतिपदार्थाः :–

हि (यतः) = यस्मात् कारणात्
सः = तारकासुरः
संसुप्तः सन् = संविष्टः सन्
श्वाससाधारणानिलैः = निश्वास–समानवातैः (ततोऽप्याधिक्ये निद्राभङ्गभयात्)
बाष्पसीकरवर्षिभिः = अश्रुजलकणवर्षणशीतलैः
सुरबन्दीनां = सुरप्रग्रहस्त्रीणां
चामरैः = प्रकीर्णकैः
वीज्यते। = निर्वाप्यते।

भावः :– १. तस्य तारकासुरस्य निद्रावस्थायां बन्दीकृतानां सुरवनितानां सामान्यश्वासानिलैः नेत्रैः अश्रुजलकणवर्षणशीतलैः चामरैः सेवाम् आचरन्ति।

२. संसुप्तः सः तारकासुरः बलात्कारेण हृतानां देवाङ्गनानां पतिविरहदुःखदीर्घनिःश्वासवायु–समानवायुभिः भूयः भूयः अश्रुमार्जनासक्ताभ्यां कराभ्यां व्यजनग्रहणात् अश्रुबिन्दुवर्षणशीलैः चामरैः वीजितः भवति।

विशेषांशाः :–

१. संसुप्तः – सम्यक् सुप्तः संसुप्तः। **२. श्वाससाधारणानिलैः** – श्वासेन साधारणः श्वाससाधारणः। श्वाससाधारणः अनिलः येषां तानि – श्वाससाधारणानिलानि, तैः श्वाससाधारणानिलैः। **३. बाष्पसीकरवर्षिभिः** – बाष्पाणां सीकराः – बाष्पसीकराः, तान् बाष्पसीकरान्। बाष्पसीकरान् वर्षन्ति तच्छीलानि – बाष्पसीकरवर्षिणः, तैः बाष्पसीकरवर्षिभिः। **४. सुरवन्दीनाम् –** सुराणां वन्द्यः सुरवन्द्यः, तासां सुरवन्दीनाम्।

१. भोजराजेन उक्तम् – **वन्दी परस्य वनिता हृता बद्ध्वा बलेन या** इति,

२. **चामरं तु प्रकीर्णकम्** इत्यमरः।

३. **सीकरोऽम्बुकणाः स्मृताः** इत्यमरः।

अथ धनापहरणमाह –

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु।।४३।।

पदच्छेदः :– उत्पाट्य, मेरुशृङ्गाणि, क्षुण्णानि, हरिताम्, खुरैः, आक्रीडपर्वताः, + तेन, कल्पिताः, स्वेषु, वेश्मसु।

अन्वयक्रमः :– तेन हरितां खुरैः क्षुण्णानि मेरुशृङ्गाणि उत्पाट्य स्वेषु वेश्मसु आक्रीडपर्वताः कल्पिताः।

प्रतिपदार्थाः :–

तेन	= तारकासुरेण
हरितां	= घोटकानाम् /अश्वानाम्
खुरैः	= शफैः
क्षुण्णानि	= चूर्णितानि
मेरुशृङ्गाणि	= सुमेरुशिखराणि
उत्पाट्य	= उन्मूल्य

स्वेषु	= स्वीयेषु
वेश्मसु	= सद्मसु
आक्रीडपर्वताः	= क्रीडाशैलाः
कल्पिताः।	= कृताः।

भावः :– मेरुपर्यन्तम् अनुदिनं गच्छतां सूर्याश्वानां खुरैः चूर्णितानि सुमेरोः शिखराणि तेन तारकासुरेण उत्पाट्य स्वगृहेषु क्रीडापर्वताः रचिताः सन्ति।

विशेषांशाः :– १. मेरुशृङ्गाणि – मेरोः शृङ्गाणि मेरुशृङ्गाणि। २. आक्रीडपर्वताः – आक्रीडन्ते एष इति आक्रीडाः। आक्रीडाः च पर्वताः आक्रीडपर्वताः।

१. **हरित् सूर्ये च सूर्याश्वे वर्णे च हरिते दिशि** इति विश्वः।

२. **शफं क्लीबे पुमान् खुरः** इत्यमरः।

३. **कूटोऽस्त्रि शिखरं शृङ्गम्** इत्यमरः।

४. **वेश्म सद्म निकेतनम्** इत्यमरः।

५. **महीध्रे शिखरि–क्ष्माभृत्–अहार्यधर–पर्वता** इत्यमरः।

अथ देवोपभोगसाधनानां सुवर्णकमलानाम् अपहरणमाह –

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम्।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्।। ४४।।

पदच्छेदः :– मन्दाकिन्याः, पयः, शेषम्, दिग्वारणमदाविलम्, हेम+अम्भोरुहसस्यानाम्, तद्वाप्यः धाम।

अन्वयक्रमः :– साम्प्रतं मन्दाकिन्याः दिग्वारणमदाविलं पयः शेषम्। हेमाम्भोरुहसस्यानां तद्वाप्यः धाम।

प्रतिपदार्थाः :–

साम्प्रतं	= सम्प्रति
मन्दाकिन्याः	= आकाशगङ्गायाः
दिग्वारणमदाविलं	= दिग्गजदानजलकलुषं
पयः	= जलम् एव
शेषम्।	= शिष्टम्

हेमाम्भोरुहसस्यानां	= सुवर्णपद्मधान्यानाम् तु
तद्वाप्यः	= तद्दीर्घिकाः एव
धाम।	= स्थानम् आसन्।

भावः :– तारकासुरः स्वर्गङ्गासुवर्णकमलानि उत्पाट्य स्ववापी रचनायाम् उपयुङ्क्तवान्। ततश्चेदानीं दिङ्मातङ्गमदजलकलुषीभूतं मन्दाकिनीजलमेवावशिष्टमस्ति।

विशेषांशाः :– १. दिग्वारणमदाविलम् – दिशां वारणाः दिग्वारणाः। दिग्वारणानां मदा, दिग्वारणमदा। दिग्वारणमदैः आवलिम् दिग्वारणमदाविलम्। **२. अम्भोरुहसस्यानाम् –** अम्भसि रोहन्ति इति अम्भोरुहाणि। अम्भोरुहाणि एव शस्यानि अम्भोरुहसस्यानि, तेषाम् – अम्भोरुहसस्यानाम्। **३. तद्वाप्यः –** तस्य वाप्यः तद्वाप्यः।

१. **मतङ्गजो गजो नागः कुञ्जरी वारणः करी** इति।
२. **दशश्च ककुभे काष्ठा आशाश्च हरितश्च ताः** इति चामरः।
३. **मन्दाकिनी वियद्गङ्गा स्वर्नदी स्वर्दीर्घिका** इति चामरः।
४. **कलुषोऽनच्छ आविलः** इति चामरः।
५. **पयः कीलालममृतं जीवनं भुवनं वनम्** – इति चामरः।
६. **बिसप्रसून–राजीव–पुष्कराम्भोरुहाणि च** – इति चामरः .

देवनाम् अनुरोधमाह–

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि।। ४५।।

पदच्छेदः :– भुवन+आलोकनप्रीतिः, स्वर्गिभिः, + न, + अनुभूयते, खिलीभूते, विमानानाम्, तदापातभयात्, पथि।

अन्वयक्रमः :– तदापातभयात् विमानानां पथि खिलीभूते सति स्वर्गिभिः भुवनालोकनप्रीतिः न अनुभूयते।

प्रतिपदार्थाः :–

तदापातभयात् = तारकासुरागमनभीतेः
विमानानां = व्योमयानानां
पथि = मार्गे
खिलीभूते सति = प्रहतीभूते सति
स्वर्गिभिः = स्वर्गस्थैः
भुवनालोकनप्रीतिः = लोकावलोकनानुरागः
न अनुभूयते। = न उपयुज्यते।

भावः :–तारकासुरस्य आक्रमणभीत्या विमानमार्गे प्रहतीभूते सति स्वर्गवासिभिः देवैः लोकदर्शनप्रेम न प्राप्यते।

विशेषांशाः :– १. तदापातभयात् – तस्य आपातः तदापातः, तस्मात् भयं तदापातभयम्, तस्मात् तदापातभयात्। **२. खिलीभूते –** अखिलः खिलः सम्पद्यते तथाभूतः – खिलीभूतः, तस्मिन् खिलीभूते। **३. स्वर्गिभिः –** स्वर्गः अस्ति येषां ते स्वर्गिणः, तैः स्वर्गिभिः। ४. भुवनालोकनप्रीतिः – भुवनानाम् आलोकनम् **– भुवनालोकनम्। तत्र प्रीतिः भुवनालोकनप्रीतिः।**

१. व्योमयानं विमानोऽस्त्रि इत्यमरः। **२. अयनं वर्त्म मार्गाध्वा पन्थानः पदवी सृतिः** इत्यमरः। **जगती लोको विष्टपं भुवनं जगत्** इत्यमरः। **द्वेऽखिला प्रहिते समे** इति चामरः।

अथ भोजनस्यापि अपहरणमाह –

यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः।। ४६।।

पदच्छेदः :– यज्वभिः, सम्भृतम्, हव्यम्, विततेषु, + अध्वरेषु, सः, जातवेदोमुखात्, + मायी, मिषताम्, आच्छिनत्ति, नः।

अन्वयक्रमः :– यज्वभिः विततेषु अध्वरेषु सम्भृतं हव्यं मायी सः नः मिषतां जातवेदोमुखात् आच्छिनत्ति।

प्रतिपदार्थाः :–

यज्वभिः = विधिवद् इष्टवद्भिः
विततेषु = विस्तृतेषु
अध्वरेषु = यागेषु

सम्भृतं = दत्तं
हव्यं = हविः
मायी = मायावी
सः = तारकासुरः
नः = अस्माकम्
मिषतां = पश्यताम्
जातवेदोमुखात् = वह्निमुखात्
आच्छिनत्ति। = आक्षिप्य गृह्णाति।

भावः :– मायावी तारकासुरः यज्ञकर्तृभिः यज्ञानुष्ठाने समर्पितं हव्यं पश्यतामेव अस्माकं वह्निमुखादपहरति।

विशेषांशाः :– १. यज्वभिः – विधिवत् इष्टवन्तः इति यज्वनः, तैः यज्वभिः। **२. हव्यम् –** हूयसे इति हव्यं तत् हव्यम्। **३. मायी –** माया अस्यास्तीति मायी। **४. मिषताम् – मिषन्ति इति मिषन्तः, तेषां मिषन्ताम्। ५. जातवेदोमुखात् –** जातवेदा एव मुखं जातवेदोमुखम्, तस्मात् जातवेदोमुखात्।

१. यज्वा तु विधिनेष्टवान् इत्यमरः। **२. यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः** इति चामरः। **स्यान्मायाः शाम्बरी** इत्यमरः। **कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्** इति चामरः।

किं बहुना सुरपतेरश्वरत्नमपि तेनापहृतम् –

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः।। ४७।।

पदच्छेदः :– उच्चैः, + उच्चैःश्रवाः, तेन, हयरत्नम्, अहारि, च, देहबद्धम् , इव, इन्द्रस्य, चिरकाल+अर्जितम्, यशः।

अन्वयक्रमः :– च तेन उच्चैः उच्चैःश्रवाः हयरत्नम्, देहबद्धं चिरकालार्जितम् इन्द्रस्य यश इव अहारि।

प्रतिपदार्थाः :–

च = किञ्च

तेन = तारकेण
उच्चैः = उन्नतः
उच्चैःश्रवाः = उच्चैश्श्रवसो नामकं
हयरत्नम् = वाजिरत्नम्
देहबद्धं = मूर्तिमत्
चिरकालार्जितम् = बहुसमयोपार्जितम्
इन्द्रस्य = सुरपतेः
यश इव = कीर्तिः
अहारि। = अपहृतम्।

भावः :–किञ्च स तारकासुरः इन्द्रस्य बहुकालसञ्चितं मूर्तिमत् यशः इव प्रोन्नतम् उच्चैःश्रवः अभिधेयं घोटकरत्नम् अपहृतवान्।

विशेषांशाः :– १. उच्चैःश्रवाः – उच्चैः श्रवो यस्य सः उच्चैःश्रवाः। **२. हयरत्नम् –** हयः रत्नम् इव हयरत्नम्। अथवा किं वा हयेषु रत्नं (श्रेष्ठम्) हयरत्नम्। **३. चिरकालार्जितम् –** चिरकालः अर्जितम् चिरकालार्जितम्।

१. वाजि–वाहार्व–गन्धर्वः हय–सैन्धवसप्तयः इत्यमरः। **२. कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिः तनुस्तनू** इत्यमरः। **३. यशः कीर्तिः समज्ञा च** इत्यमरः। **४. कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः** इत्यमरः। **रत्नं स्वजातिश्रेष्ठेऽपि** इति चामरः।

तर्हि सामाद्युपायाः कथं न प्रयुक्ताः इत्यत्राह –

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके।। ४८।।

पदच्छेदः :– तस्मिन्, + उपायाः, सर्वे, नः, क्रूरे, प्रतिहतक्रियाः, वीर्यवन्ति, + औषधानि, + इव, विकारे, सान्निपातिके।

अन्वयक्रमः :– क्रूरे तस्मिन् नः सर्वे उपायाः सान्निपातिके विकारे वीर्यवन्ति औषधानि इव प्रतिहतक्रियाः भवन्ति।

प्रतिपदार्थाः :–

क्रूरे = घातके
तस्मिन् = तारकासुरे
नः = अस्माकम्

सर्वे उपायाः = सकलाः सामादयः (साम-दान-भेद-दण्डाः)
सान्निपातिके = सन्निपातरोगभवे
विकारे = रोगे
वीर्यवन्ति = सारवन्ति
औषधानि इव = भेषजानि इव
प्रतिहतक्रियाः = निष्फलप्रयोगाः
भवन्ति। = जायन्ते।

भावः :- सन्निपातदोषजन्ये ज्वरादौ महावीर्याणि भेषजानि इव अस्माकं देवानां सर्वे सामादयः उपायाः क्रूरे तस्मिन् तारकासुरे निष्फला भवन्ति।

विशेषांशाः :- १. सान्निपातिके – सन्निपातात् भवः सान्निपातिकः, तस्मिन् सान्निपातिके। **२. वीर्यवन्ति** – वीर्यम् अस्य अस्तीति **वीर्यवत्,** (येषु) तानि वीर्यवन्ति। **३. औषधानि** – ओषधय एव **औषधानि।** ४. **प्रतिहतक्रियाः –** प्रतिहता क्रियाः येषां ते प्रतिहतक्रियाः।

१. नृशंसः घातकः क्रूरः इत्यमरः। **२. भेषजौषधभैज्यान्यगदो जातुरित्यपि** इत्यमरः। **विकारो रोगविकृतिः** इति वैजयन्ती।

सन्निपातज्वरे औषधीनां नैष्फल्यमाहायुर्वेदशास्त्रे –

वात-पित्त-कफानां च सन्निपातो यदा भवेत्।
तदा जातो ज्वरः तीव्रः ह्यसाध्यः सर्वभेषजैः।। इति।

तत्र जयाशायाः वैफल्यम् आह-

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्।। ४९।।

पदच्छेदः :- जयाशा, यत्र, च, + अस्माकम्, प्रतिघात+उत्थित+अर्चिषा, हरिचक्रेण, तेन, + अस्य, कण्ठे, निष्कम्, इव, अर्पितम्।

अन्वयक्रमः :- यत्र अस्माकं जयाशा प्रतिघातोत्थितार्चिषा तेन हरिचक्रेण च अस्य कण्ठे निष्कम्

इव अर्पितम्।

प्रतिपदार्थाः :–

यत्र	= हरिचक्रे
अस्माकं	= देवानाम्
जयाशा	= विजयाशंसा (आसीत्)
प्रतिघातोत्थितार्चिषा	= प्रतिहन्युद्गतज्वालेन
तेन	= जगत्प्रसिद्धेन
हरिचक्रेण च	= विष्णोः सुदर्शनचक्रेण अपि
अस्य	= तारकासुरस्य
कण्ठे	= गले
निष्कम् इव	= कण्ठभूषणम् इव
अर्पितम्।	= दत्तम् /जातम्।

भावः :– यस्मिन् सुदर्शनचक्रे अस्माकं देवानां **नूनं वयमनेन जेष्यामः** इति विजयाशा आसीत्, शिलातलसमकर्कशे तारकासुरकण्ठे प्रक्षिप्तेन तेन विष्णोः सुदर्शनचक्रेण तत्कण्ठकाठिन्यान्निर्गतया अनलज्वालयाऽस्य ग्रीवायां कण्ठभूषणमर्पितम् इव।

विशेषांशाः :–१. यत्र – यस्मिन् इति यत्र। **२. जयाशा** – जयस्य आशा जयाशा। **३. प्रतिघातोत्थितार्चिषा** – प्रतिघातेन उत्थितं प्रतिघातोत्थितम्। प्रतिघातोत्थितम् अर्चिः यस्य तत् प्रतिघातोत्थितार्चिः, तेन प्रतिघातोत्थितार्चिषा। **४. हरिचक्रम्** – हरेः चक्रं हरिचक्रम्।

अथ तदवष्टम्भेन तारकासुरस्य हस्तिनां दुर्विलसितमाह–

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः।। ५०।।

पदच्छेदः :– तदीयाः, + तोयदेषु, + अद्य, पुष्कर+आवर्तकादिषु, अभ्यस्यन्ति, तटाघातम्, निर्जितैः, + ऐरावताः, गजाः।

अन्वयक्रमः :– अद्य निर्जितैः ऐरावताः तदीयाः गजाः पुष्करावर्तकादिषु तोयदेषु तटाघातम्

अभ्यस्यन्ति।

प्रतिपदार्थाः :-

अद्य	= इदानीम्
निर्जितैः ऐरावताः	= विजिताः अभ्रमातङ्गाः
तदीयाः	= तारकासुरसम्बन्धिनः
गजाः	= नागाः
पुष्करावर्तकादिषु	= पुष्करावर्तप्रभृतिषु
तोयदेषु	= मेघेषु
तटाघातम्	= वप्रक्रीडाम्
अभ्यस्यन्ति।	= अभ्यासं प्रकुर्वन्ति

भावः :- इन्द्रगजस्य ऐरावतस्य पराजयकर्तारः तारकासुरगजाः दर्पकण्डू दूरीकरणार्थं पुष्करावर्तकादिषु महामेघेषु भूयो भूयो दन्तप्रहारं कुर्वन्ति।

विशेषांशाः :- १. अस्मिन् अहनि इति अद्य। **२. निर्जितैरावताः –** निर्जित ऐरावतः यैः ते निर्जितैरावताः। **३. तदीयाः –** तस्य इमे तदीयाः। **४. पुष्करावर्तकादिषु –**पुष्कराश्च आवर्तकाश्च पुष्करावर्तकाः। ते आदयः येषां ते पुष्करावर्तकादयः। तेषु पुष्करावर्तकादिषु। **५. तटाघातम् –** तटे आघातम् तटाघातम्।

१. **ऐरावतोऽभ्रमातङ्गैरावणा-भ्रमुवल्लभाः** इत्यमरः।

२. **मतङ्गजो गजो नागः कुञ्जरः वारणः करी –** इत्यमरः।

अथ तस्य प्रतीकारं कर्तुं प्रार्थयते –

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।। ५१।।

पदच्छेदः :- तत्, + इच्छामः, विभो!, स्रष्टुम्, सेना+अन्यम्, तस्य, शान्तये, कर्मबन्धच्छिदम्, धर्मम्, भवस्य, + इव, मुमुक्षवः।

अन्वयक्रमः :- तत् हे विभो! मुमुक्षवः भवस्य शान्तये कर्मबन्धच्छिदं धर्मम् इव तस्य शान्तये सेनान्यं स्रष्टम् इच्छामः।

प्रतिपदार्थाः :–

तत्	= तस्मात्, कारणात्
हे विभो!	= हे स्वामिन् !
मुमुक्षवः	= मुक्तिकामिनः
भवस्य	= संसारस्य
शान्तये	= निवृत्तये
कर्मबन्धच्छिदं	= क्रियापाशच्छेदकम्
धर्मम् इव	= सुकृतम् इव
तस्य	= तारकासुरस्य
शान्तये	= नाशाय
सेनान्यं	= सेनापतिम्
स्रष्टुम्	= निर्मातुम्
इच्छामः।	= अभिलषामो वयम्।

भावः :– हे स्वामिन्! (जगत्स्रष्टः!) यथा मुमुक्षवः जगतो निवृत्तये निवृत्तिलक्षणं धर्मं वाञ्छन्ति तथैव वयं तारकासुरस्य विनाशाय देवानां सेनायाः नायकं निर्मातुम् इच्छामः।

विशेषांशाः :–१. मुमुक्षवः – मोक्तुम् इच्छवः मुमुक्षवः। **२. कर्मबन्धच्छिदम् –** कर्म एव बन्धः कर्मबन्धः। कर्मबन्धं छिनत्तीति कर्मबन्धच्छित् तं कर्मबन्धच्छिदम्। **३. धर्मः –** धरति विश्वमिति धर्मः। किं वा ध्रियते येन स धर्मः, तं धर्मम्। ४. **सेनान्यम् –** सेनां नयतीति सेनानी तं सेनान्यम्।

१. ध्वजिनी वाहिनी सेना पृतनाऽजी चमूः – इत्यमरः।

अथ सेनानीसृष्टेः प्रयोजनमाह–

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम्।।५२।।

पदच्छेदः :– गोप्तारम्, सुरसैन्यानाम्, यम्, पुरस्कृत्य, गोत्रभित्, प्रति+आनेष्यति, शत्रुभ्यः, बन्दीम्, इव, जयश्रियम्।

अन्वयक्रमः :– सुरसैन्यानां गोप्तारं यं पुरस्कृत्य गोत्रभित् जयश्रियं बन्दीम् इव शत्रुभ्यः प्रत्यानेष्यति।

प्रतिपदार्थाः :–

सुरसैन्यानाम् = देवसैनिकानां
गोप्तारं = रक्षकं
यं = सेनापतिम्
पुरस्कृत्य = पुरोधाय
गोत्रभित् = वासवः
जयश्रियं = विजयश्रियम्
बन्दीम् इव = हठहृतमहिलाम् इव
शत्रुभ्यः = अरिभ्यः सकाशात्
प्रत्यानेष्यति। = प्रत्याहरिष्यति।

भावः :– हे प्रभो! यादृशेन सेनापतिना देवराजः पूर्णां शक्तिं सम्पाद्य दुर्जयो भूत्वा स्वयमेव बन्दीभूताम् इव वैरिवशवर्तिनीं देवलक्ष्मीं प्रत्यानेतुं शक्तो भवेत्, तादृशः सेनापतिः त्वया स्रष्टव्य इति।

विशेषांशाः :– १. सुरसैन्यानाम् – सेनायां समवेताः सैन्याः। सुराणां सैन्याः – सुरसैन्याः, तेषां सुरसैन्यानाम्। **२. गोप्तारम् –** गोपयतीति गोप्ता, तं गोप्तारम्। **३. पुरस्कृत्य –** पुरः कृत्वा पुरस्कृत्य। **४. गोत्रभित् –** गां त्रायन्ते इति गोत्रः। तान् भिनत्तीति गोत्रभित्। **५. जयश्रियम् –** जयस्य श्रीः जयश्रीः, तां जयश्रियम्।

१. सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते – इत्यमरः। **२. सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा** – इत्यमरः।

अथ प्रजापतेः प्रतिवचनम् आह–

वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा।।५३।।

पदच्छेदः :– वचसि,+ अवसिते, तस्मिन्, ससर्ज, गिरम्, आत्मभूः, गर्जितान्तराम्, वृष्टिं जिगाय सा।

अन्वयक्रमः :– तस्मिन् वचसि अवसिते सति आत्मभूः गिरं ससर्ज। सा सौभाग्येन गर्जितान्तरां वृष्टिं जिगाय।

प्रतिपदार्थाः :–

तस्मिन्	= वाचस्पत्ये
वचसि	= वचने
अवसिते सति	= समाप्ते सति
आत्मभूः	= विधाता
गिरं	= वाणीम्
ससर्ज।	= जगाद।
सा	= गीः (वाणी)
सौभाग्येन	= मनोहरत्वेन
गर्जितान्तरां	= मेघगर्जिनानन्तरम् (अम्भोदस्तनितान्तरम्)
वृष्टिं	= वर्षणम् इव
जिगाय।	= जितवती।

भावः :– गुरुवचनानन्तरं ब्रह्मा यां वाणीमुवाच सा मेघगर्जितानन्तरम् जायामानां वृष्टिमपि जितवती ।

विशेषांशाः :– १. आत्मभूः – आत्मना भवतीति आत्मभूः। **२. गर्जितानन्तराम् –** गर्जितस्य गर्जितात् वा अनन्तरा गर्जितानन्तरा। तां गर्जितानन्तराम्।

१. ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती इत्यमरः।

ब्रह्मणो गिरं प्रपञ्चयति –

सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम्।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना।। ५४।।

पदच्छेदः :– सम्पत्स्यते, वः, कामः, + अयम्, कालः, कः + चित्, प्रतीक्ष्यताम्, न, तु + अस्य, सिद्धौ, यास्यामि, सर्गव्यापारम्, आत्मना।

अन्वयक्रमः :– (हे देवाः!) अयं वः कामः सम्पत्स्यते। कश्चित् कालः प्रतीक्ष्यताम्। तु अस्य सिद्धौ

आत्मना सर्गव्यापारं न यास्यामि।

प्रतिपदार्थाः :–

हे देवाः!

अयं	= एष
वः	= युष्माकम्
कामः	= अभिलाषः
सम्पत्स्यते।	= सेत्स्यति
कश्चित् कालः	= कियान् समयः
प्रतीक्ष्यताम्।	= प्रतीक्षा क्रियताम्
तु	= किन्तु
अस्य	= कामस्य
सिद्धौ	= निष्पत्तौ
आत्मना	= स्वयम्
सर्गव्यापारं	= सृष्टिक्रियाम्
न यास्यामि।	= न गमिष्यामि।

भावः :– हे देवाः! युष्माकं सेनानायकप्राप्तिरूपो मनोरथः सिद्धिं गमिष्यति। किन्तु कार्यसाधनसमर्थः कियान् कालः प्रतिपाल्यताम् युष्माकम्। कार्यसम्पादनाय अहं स्वांशेनात्मानं नव स्रक्ष्यामि।

विशेषांशाः :– १. सर्गव्यापारम् – सर्ग एव व्यापारः – सर्गव्यापारः, तं सर्गव्यापारम्।

१. **कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः** इत्यमरः।

२. **कामोऽभिलाषस्तर्षश्च** इत्यमरः।

ब्रह्मस्वांशेनानवतरणे कारणमाह –

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।। ५५।।

पदच्छेदः :– इतः, सः, दैत्यः, प्राप्तश्रीः, न, + इतः, + एव, + अर्हति, क्षयम्, विषवृक्षः, + अपि, संवर्ध्य, स्वयम्, छेत्तुम्, असाम्प्रतम्।

अन्वयक्रमः :– इतः प्राप्तश्रीः सः दैत्यः इत एव क्षयं न अर्हति, विषवृक्षः अपि संवर्ध्य स्वयं छेत्तुम् (इष्यते तत्) असाम्प्रतम्।

प्रतिपदार्थाः :–

इतः	= मत्तः
प्राप्तश्रीः	= लब्धोदयः
सः दैत्यः	= दैत्यः तारकासुरः
इत एव	= मत्त एव
क्षयं	= नाशम्
न अर्हति,	= न योग्यो भवति।
विषवृक्षः अपि	= गरलतरुमपि
संवर्ध्य	= सम्यक् वर्धयित्वा
स्वयं छेत्तुम्	= आत्मना
(इष्यते	= भेत्तुम्
तत्) असाम्प्रतम्।	= न युज्यते।

भावः :– १. मया दत्तवरस्य तारकासुरस्य मयैव हननम् अनुचितम्। यतो हि केनचित् पुंसा प्राणिना मरणप्रदोऽपि विषवृक्षः येन केनापि प्रकारेण वर्धितः स्वयं छेत्तुं न युक्तः। विषवृक्षो हि जीवानां घातको वृक्षविशेषो वर्तते – यथा चोक्तं –

यस्य स्पर्शनमात्रेण वायुसंस्पर्शनेन च।
म्रियन्ते जन्तवः सर्वे विषवृक्षः सः कीर्तितः।। इति।

२. यथा स्वयं संवर्धितस्य विषवृक्षस्य अपि छेदनम् अनुचितं वर्तते, तथैव मया दत्तवरदानेन वर्धितस्य तारकासुरस्य नाशः मयैव न कर्तव्यः।

विशेषांशाः :– १. इतः – अस्मात् इति इतः। **२. प्राप्तश्रीः –** प्राप्ता श्रीः येन सः प्राप्तश्रीः। **३. दैत्यः –** दितेः अपत्यं पुमान् दैत्यः। **४. विषवृक्षः –** विषस्य वृक्षः विषवृक्षः। **५. असाम्प्रतम् –** न साम्प्रतम् असाम्प्रतम्।

स्वयं तस्य हनने मम प्रतिज्ञाभङ्गोऽपि स्यादित्याह–

वृतं तेनेदमेव प्राङ्मया चास्मै प्रतिश्रुतम्।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः।। ५६।।

पदच्छेदः :– वृतम्, तेन, + इदम्, एव, प्राक्, + मया, च, + अस्मै, प्रतिश्रुतम्, वरेण, शमितम्, लोकान्, अलम्, दग्धुम्, हि, तत् तपः।

अन्वयक्रमः :– प्राक् तेन इदम् एव वृतम्। मया अस्मै प्रतिश्रुतं च। हि लोकान् दग्धुं तत् तपः अलम्। मया तु वरेण शमितम्।

प्रतिपदार्थाः :–

प्राक्	= पूर्वम्
तेन	= तारकासुरेण
इदम् एव	= एवं देवैः अवध्यत्वमेव
वृतम्।	= प्रार्थितम्
मया	= ब्रह्मणा च
अस्मै	= तारकासुराय
प्रतिश्रुतं च।	= प्रतिज्ञातम् च।
हि	= यस्मात् कारणात्
लोकान्	= भुवनानि
दग्धुं	= भस्मीभूतं कर्तुं
तत् तपः	= तस्य तपः
अलम्।	= समर्थः
मया तु	= ब्रह्मणा तु
वरेण	= वरदानेन
शमितम्।	= शान्तिं नीतम्।

भावः :– सः तारकासुरः स्वकीयेन उग्रेण तपसा सन्तुष्टः मां प्रति वरदानसमये – देवैः अवध्यत्वं वरं प्रार्थितवान्। मया च तथाऽस्तु इति प्रतिज्ञातम्। यदि तस्मिन् समयेऽहं तेनाभ्यर्थितं वरं न अदास्यम्, तर्हि नूनं तन्मूर्धनो निर्गता वह्निज्वाला सकलान् अपि चराचरलोकान् भस्मसात् अकरिष्यत्।

एतादृशमेव हिरण्यकश्यपुतपः प्रसङ्गे भगवता व्यासेन प्राक्तम् –

तस्य मूर्ध्नः समुद्भूतं सधूमोऽग्निस्तपोमयः।
तिर्यगूर्ध्वमधो लोकानतपत् विश्वगीरितः।।

विशेषांशाः :– १. तत्तपः – तस्य तपः तत्तपः। **२. शमितम् –** अशमि इति शमितम्।

अथ आपत्प्रतीकारोपायं दर्शयितुम् आरभते –

संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः।
अंशादृते निषिक्तस्य नीललोहितरेतसः।। ५७।।

पदच्छेदः :– संयुगे, सांयुगीनम्, तम्, उद्यतम्, प्रसहेत, कः?, अंशात्, + ऋते, निषिक्तस्य, नीललोहितरेतसः।

अन्वयक्रमः :– संयुगे उद्यतं सांयुगीनं निषिक्तस्य नीललोहितरेतसः अंशात् ऋते कः प्रसहेत।

प्रतिपदार्थाः :–

संयुगे	= संप्रहारे, युद्धे
उद्यतं	= तत्परम्
सांयुगीनं	= युद्धे सोढुम्
तम्	= दुर्मदं तारकासुरम्
निषिक्तस्य	= प्रजार्थम् आहितस्य
नीललोहितरेतसः	= शिवशुक्रस्य
अंशात् ऋते	= अवयवात् विना
कः प्रसहेत।	= सोढुं कः शक्नुयात् ?

भावः :– युद्धे तत्परं संग्रामविशारदं तारकासुरं (जेतुं) क्वचित् स्त्रीयोनौ निषिक्तस्य शिववीर्यस्यांशाद्विनाऽन्यः कः सोढुं शक्नुयात् ? न कोऽपि शक्नोति इत्यर्थः।

विशेषांशाः :– १. सांयुगीनम् – संयुगे साधुः सांयुगीनः, तं सांयुगीनम्। **२. नीललोहितरेतसः –** नीलः कण्ठे, लोहितश्च केशेषु इति **– नीललोहितः** इति पुराणे प्रसिद्धम्। नीललोहितस्य रेतः नीललोहितरेतः, तस्य नीललोहितरेतसः।

१. **सम्प्रहार–अभिसम्पात–कलिसंस्फोट–संयुगाः** इत्यमरः।
२. **शुक्रं तेजोरेतसी च बीजं वीर्येन्द्रियाणि च** इत्यमरः।
३. **कृशानुरेता सर्वज्ञो धूर्जटी नीललोहितः** इत्यमरः।

कथमसौ ईदृक् शक्तिरित्याह–

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम्।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना।। ५८।।

पदच्छेदः :– सः, हि, देवः, परम्, ज्योतिः, तमः, पारे, व्यवस्थितम् , परिच्छिन्नप्रभाव+ऋद्धिः, + न, मया, न, च, विष्णुना।

अन्वयक्रमः :– हि (यतः) सः देवः तमःपारे व्यवस्थितं परं ज्योतिः अस्ति। अत एव मया विष्णुना च परिच्छिन्नप्रभावर्द्धिः न भवति।

प्रतिपदार्थाः :–

हि (यतः)	= यस्मात् कारणात्
सः देवः	= भगवान् शङ्करः
तमःपारे	= तमोगुणात् परं
व्यवस्थितं	= प्रतिष्ठितम्
परं	= देशकालाद्यनवच्छिन्नं
ज्योतिः	= (परं) तेजः
अस्ति।	= विद्यते।
अत एव	= अस्मात् कारणात्
मया	= ब्रह्मणा
विष्णुना च	= नारायणेन च
परिच्छिन्नप्रभावर्द्धिः	= ज्ञानसामर्थ्यसम्पत्तिः
न भवति।	= न भवति।

भावः :– स हि देवो भगवान् शङ्करः देशकालाद्यनवच्छिन्नं परमोत्कृष्टं तेजः अस्ति। अपि च तच्च तेजः अविद्यायाः पारं स्थितश्चास्ति। यतः भगवान् नारायणः अहं ब्रह्मा च उभौ आवां शिवस्य महिम्नः समृद्धिम् इयत्तया परिच्छेत्तुं न समर्थौ बभूव।

तथा च इयं पौराणिकी कथा :– एकदा भगवतः शिवस्य शक्तेः अन्तं ज्ञातुं स्ववाहनं हंसमारुह्य ब्रह्मा उपरि गतः। विष्णुश्च भूदाररूपम् आदाय अधोभागं गतवान्। किन्तु चिरकालं सततं गच्छद्भ्यामपि ताभ्यां न तस्यान्तः ज्ञातः इति। तथा चोक्तं – **नोर्ध्वं गम्य सरसिजभुवो नाप्यधः शार्ङ्गपाणेः।** इति।

विशेषांशाः :– १. देवः – दीव्यति इति देवः। **२. तमः पारे –** तमसः पारं तमःपारं तस्मिन् तमःपारे। **३. परिच्छिन्नप्रभावर्द्धिः –** प्रभावस्य ऋद्धिः प्रभावर्द्धिः। परिच्छिन्ना प्रभावर्द्धिः यस्य सः परिच्छिन्नप्रभावर्द्धिः।

सम्प्रति तदंशोत्पत्तावुपायं दर्शयति –

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। ५९।।

पदच्छेदः :– उमारूपेण, ते, यूयम्, संयमस्तिमितम्, मनः, शम्भोः, यतध्वम्, आक्रष्टुम्, अयस्कान्तेन, लोहवत्।

अन्वयक्रमः :– ते यूयं संयमस्तिमितं शम्भोः मनः उमारूपेण अयस्कान्तेन लोहवत् आक्रष्टुं यतध्वम्।

प्रतिपदार्थाः :–

ते	= कार्यार्थिनः
यूयं	= देवाः

संयमस्तिमितं	= समाधिनिश्चसम्
शम्भोः	= शूलिनः/शिवस्य
मनः	= हृदयम्
उमारूपेण	= गौरीसौन्दर्येण (माध्यमेन)
अयस्कान्तेन	= अयस्कान्तमणिना
लोहवत्	= लोह इव
आक्रष्टुं	= आहर्तुम्
यतध्वम्।	= उपायं कुरुत।

भावः :– १. सेनानी–सृष्टिमाध्यमेन विपत्प्रतीकारं प्रार्थयमानाः यूयं रागद्वेषरहितं निश्चलं सदाशिवस्य हृदयम् अयस्कान्तमणिना लोह इव पार्वतीसौन्दर्येण आक्रष्टुं यत्नं कुरुत।

२. योग्यतमसेनापतेः उत्पत्त्या तारकासुरस्य वधाय सम्प्रार्थ्यमानाः हे देवाः यूयम् यथा अयस्कान्तमणिः लोहाकर्षकं भवति तद्वत् पार्वतीसौन्दर्यमणिना राग–द्वेषरहितस्य निर्गुणेशस्य हृदयम् आक्रष्टुं यत्नो विधीयन्ताम्।

विशेषांशाः :– १. संयमस्तिमितम् – संयमेन स्तिमितम् संयमस्तिमितम्। तत् संयमस्तिमितम्। **२. उमारूपेण –** उमायाः रूपम् उमारूपम्। तेन उमारूपेण। **३. लोहवत् –** लोहम् इव लोहवत्।

१. शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः इत्यमरः।
२. चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः इत्यमरः।
३. उमा कात्यायनी गौरी काली हैमवतीश्वरी इति चामरः।
४. रूपशब्दस्य अर्थः विस्वकोशे उक्तं तद्यथा –

रूपं स्वभावे सौन्दर्ये नायके पशुशब्दयोः।
ग्रन्थावृतौ नाटकादावाकारश्लोकयोरपि।। इति।

न च गत्यन्तरमस्तीत्याह–

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम्।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम।। ६०।।

पदच्छेदः :– उभे, एव, क्षमे, वोढम्, उभयोः, + बीजम्, आहितम्, सा, वा, शम्भोः, + तदीया, वा, मूर्तिः, + जलमयी, मम।

अन्वयक्रमः :– उभयोः शम्भोः मम वा आहितं बीजं वोढुं क्रमेण शम्भोः सा वा मम च तदीया जलमयी मूर्तिः वा उभे एव क्षमे।

प्रतिपदार्थाः :–

उभयोः	= द्वयोः
शम्भोः	= शिवस्य
मम वा	= ब्रह्मणः वा
आहितं	= निहितम्
बीजं	= वीर्यम्
वोढुं	= धारयितुम्
क्रमेण	= क्रमशः
शम्भोः	= शङ्करस्य
सा वा	= पार्वती वा
मम च	= मे च
तदीया	= तत्सम्बन्धिनी
जलमयी	= नीररूपिणी
मूर्तिः वा	= शरीरं वा
उभे एव	= द्वे एव
क्षमे।	= समर्थे स्तः।

भावः :– उभाभ्याम् आवाभ्यां शिव–ब्रह्मभ्याम् आहितम् वीर्यम् वोढुं सा पार्वती, मे च तदीया जलमयी मूर्तिः इत्युभे एव नार्यौ समर्थे स्तः। नान्याः काश्चन स्त्रियः समर्थाः।

विशेषांशाः :–१. तदीया – तस्येयं तदीया। **२. जलमयी –** जलं रूपं यस्या सा जलमयी।

एवं कृते सति युष्माकं कार्यसिद्धिः अवश्यं भविष्यतीत्याह –

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः।। ६१।।

पदच्छेदः :– तस्य, + आत्मा, शितिकण्ठस्य, सैनापत्यम्, उपेत्य, वः, मोक्ष्यते, सुरबन्दीनाम्, वेणीः, + वीर्यविभूतिभिः।

अन्वयक्रमः :– तस्य शितिकण्ठस्य आत्मा वः सैनापत्यम् उपेत्य वीर्यविभूतिभिः सुरबन्दीनां वेणीः मोक्ष्यते।

प्रतिपदार्थाः :–

तस्य	= जगत्प्रसिद्धस्य, श्रुति–स्मृति–पुराणेतिहासादिप्रसिद्धस्य च
शितिकण्ठस्य	= श्रीकण्ठस्य शङ्करस्य
आत्मा	= पुत्रः
वः	= युष्माकम्
सैनापत्यम्	= सेनापतित्वम्
उपेत्य	= प्राप्य
वीर्यविभूतिभिः	= पराक्रम–ऐश्वर्यैः
सुरबन्दीनां	= देवाङ्गनानाम्
वेणीः	= प्रवेणीः/कचसम्पत्तिः
मोक्ष्यते।	= विस्रंसयिष्यति।

भावः :– तस्य शिवस्यात्मजः भवतां सेनापतिर्भूत्वा निजपराक्रमाधिक्यात् तारकासुरेण बलादपहृत्य वन्दीकृतानां देवाङ्गनानां संश्लिष्टान् कचान् विश्लेषयिष्यति।

विशेषांशाः :– १. शितिकण्ठस्य – शितिः कण्ठे यस्य सः शितिकण्ठः, तस्य शितिकण्ठस्य। **२. सैनापत्यम् –** सेनानां पतिः सेनापतिः, तस्य भावः सैनापत्यम्, तत् सैनापत्यम्। **३. वीर्यविभूतिभिः –** वीर्यस्य विभूतयः वीर्यविभूतयः, ताभिः वीर्यविभूतिभिः। **४. सुरवन्दीनाम् –** सुराणां वन्द्यः सुरवन्द्यः तासां सुरबन्दीनाम्।

१. उग्रः कपर्दी श्रकण्ठः शितिकण्ठः कपालभृत् – इत्यमरः .

२. **अङ्गादङ्गात् सम्भवसि हृदयादभिजायते आत्मा वै पुत्र नामासि स जीव शरदां शतम्** – इति श्रुतिः।

३. विभूतिर्भूतिरैश्वर्यम् – इति चामरः।

४. वेणी प्रवेणी – इति चामरः।

इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः।। ६२।।

पदच्छेदः :– इति, व्याहृत्य, विबुधान्, विश्वयोनिः, तिरोदधे, मनसि, + आहितकर्तव्याः, + ते, + अपि, देवाः, दिवम्, ययुः।

अन्वयक्रमः :– विश्वयोनिः विबुधान् प्रति इति व्याहृत्य तिरोदधे। ते देवा अपि मनसि आहितकर्तव्याः सन्तः दिवं ययुः।

प्रतिपदार्थाः :–

विश्वयोनिः	= संसारकारणं ब्रह्मा
विबुधान् प्रति	= सुरान् प्रति
इति	= पूर्वोक्तप्रकारम्
व्याहृत्य	= कथयित्वा
तिरोदधे।	= तिरोहितवान्
ते देवा अपि	= सुरा अपि
मनसि	= चित्ते
आहितकर्तव्याः सन्तः	= समारोपितकर्तव्याः सन्तः
दिवं	= सुरलोकम्
ययुः।	= अगच्छन्

भावः :– जगत्स्रष्टा ब्रह्मा पूर्वोक्तप्रकारेण देवान् कथयित्वा अन्तर्हितो बभूव। देवा अपि अनन्तरं करणीयं मनसि निश्चित्य स्वस्थानं स्वर्लोकं गतवन्तः।

विशेषांशाः :– १. विश्वयोनिः – विश्वस्य योनिः विश्वयोनिः। २. विबुधान् – विशेषेण बुध्यन्ति इति विबुधाः, तान् विबुधान्। ३. आहितकर्तव्याः – आहितं कर्तव्यम् यैः ते, आहितकर्तव्याः।

१. **योनिः स्त्रीणः भगस्थाने कारणे तान्त्रिके पणे** इति वैजयन्ती।

२. **त्रिदशा विबुधाः सुराः** इत्यमरः।

३. **सुरलोको द्यौ दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्** – इत्यमरः।

अथ गौरी–शङ्करसङ्गमोपायानुष्ठानरूपम् उत्तरसर्गार्थं बिन्दुमुपस्थापयति –

तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः ।
मनसा कार्यसंसिद्धौ त्वरा द्विगुणरंहसा।। ६३ ।।

पदच्छेदः :– तत्र, निश्चित्य, कन्दर्पम्, अगमत्, पाकशासनः, मनसा, कार्यसंसिद्धौ, त्वरा, द्विगुणरंहसा।

अन्वयक्रमः :– पाकशासनः तत्र निश्चित्य कार्यसिद्धौ त्वरा द्विगुणरंहसा मनसा कन्दर्पम् अगमत्।

प्रतिपदार्थाः :–

पाकशासनः	= मघवा / इन्द्रः
तत्र	= तस्मिन् विषये स्वर्गे वा
निश्चित्य	= सम्यगवधार्य
कार्यसिद्धौ	= शिव–गौरीसमागमरूपकार्यनिष्पत्तौ
त्वराद्विगुणरंहसा	= औत्सुक्यद्विगुणितवेगेन
मनसा	= चित्तेन
कन्दर्पम्	= कामम्
अगमत्।	= जगाम।

भावः :– शचीपतिः इन्द्रः स्वर्गे विधास्यमानम् उपायानुष्ठानं देवैः सह सम्यगवधार्य शिव–गौरीसङ्गमरूपकार्यसिद्धौ त्वरया द्विगुणिताभिलाषेण मनसा स्वसमीपे कन्दर्पं सस्मार।

विशेषांशाः :– १. पाकशासनः – पाकं शासयति इति पाकशासनः। **२. त्वराद्विगुणसरंहसा –** त्वराद्विगुणं रंहो यस्य तत् त्वराद्विगुणरंहः, तेन त्वराद्विगुणरंहसा। **३. कन्दर्पम् –** कुत्सितः दर्पः यस्य सः कन्दर्पः, तं कन्दर्पम्।

१. **रंहस्तरसी तु रयः स्यात् –** इत्यमरः।
२. **चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः –** इत्यमरः।
३. **कन्दर्पः दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः –** इत्यमरः।
४. **इन्द्रो मरुत्वान् मघवा बिडौजा पाकशासनः –** इत्यमरः।

अथ उत्तरसर्गकथासम्बन्धार्थं मदनस्यागमनं दर्शयति –

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा।। ६४।।

पदच्छेदः :– अथ, सः, ललितयोषित्+भ्रूलताचारुशृङ्गम्, रतिवलयपदाङ्के, चापम्, आसज्य, कण्ठे, सहचरमधुहस्तन्यस्तचूत+अङ्कुर+अस्त्रः, शतमखम्, उपतस्थे, प्राञ्जलिः, पुष्पधन्वा।

अन्वयक्रमः :– अथ सः पुष्पधन्वा ललितयोषिद्भ्रूलताचारुशृङ्गं चापं रतिवलयपदाङ्के कण्ठे आसज्य सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः प्राञ्जलिः सन् शतमखम् उपतस्थे।

प्रतिपदार्थाः :–

अथ	= इन्द्रकर्तृकमदनस्मरणानन्तरम्
सः पुष्पधन्वा	= स्मृतः कुसुमायुधः, रतिपतिः, मदनः
ललितयोषिद्भ्रूलताचारुशृङ्गं	= सुन्दरनारीभ्रूलतामनोहरकोटिम्
चापं	= धनुः
रतिवलयपदाङ्के	= मदनप्रियाकङ्कणस्थानचिह्निते
कण्ठे	= गले
आसज्य	= लगयित्वा
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः	= सुहृद्वसन्तकरार्पिताम्रमञ्जरीशस्त्रः
प्राञ्जलिः सन्	= विहिताञ्जलिः सन्
शतमखम्	= शतक्रतुम् इन्द्रम्
उपतस्थे।	= उपस्थितवान्।

भावः :– अथ इन्द्रकर्तृक–मदनस्मरणानन्तरमेव सः मदनः सौम्यस्त्री भ्रुकुटाकोटीकोमलाग्रभागं स्वकीयं चापं स्वप्रियाकङ्कणकोटिचिह्निते स्वकण्ठे संवेष्ट्य त्रिभुवनविजये सहायकस्य वसन्तस्य हस्ते आम्रमञ्जरीबाणं च संन्यस्य कृताञ्जलिः भूत्वा महेन्द्रसमीपे उपस्थितोऽभूत्।

विशेषांशाः :– १. पुष्पधन्वा – पुष्पं धनुः यस्य स पुष्पधन्वा।

२. ललितयोषिद्भ्रूलताचारुशृङ्गम् – ललितः चासौ योषित् ललितयौषित्। भ्रूवौ एव लते भ्रूवौ। ललितयोषितो भ्रूलते ललितयोषिद्भ्रूलते। ते एव चारुणी ललितयोषिद्भ्रूलताचारुणी। ते शङ्गे यस्य तत् ललितयोषिद्भ्रूलताचारुशृङ्गम्।

३. सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः – सहचरश्चासौ मधुः सहचरमधुः, तस्य हस्ते न्यस्तं सहचरमधुहस्तन्यस्तम्। चूतस्य अङ्कुरः चूताङ्कुरः। चूताङ्कुरमेवास्त्रं चूताङ्कुरास्त्रम्। सहचरमधुहस्तन्यस्तं चूताङ्कुरास्त्रं यस्य सः, सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः ।

४. शतमखम् – शतं मखा यस्य सः शतमखः तं शतमखम्।

१. पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः – इत्यमरः।
२. ललितं त्रिषु सुन्दरम् – इत्यमरः।
३. स्त्रीयोषिदबला योषा नारी सीमन्तिनी वधूः – इति चामरः।
४. **....द्रे जले क्षीरे ... पुष्परसे मधुः।**
दैत्ये चैत्रवसन्ते च जीवशोके मधुद्रुमे।। इति विश्वः।
५. आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ – इत्यमरः।
६. यज्ञः सवोऽध्वरो सप्तन्तुर्मखः क्रतुः – इत्यमरः।
७. वल्ली तु व्रततिर्लता – इत्यमरः।
८. सुन्दरं रुचिरं चारु सुषुमं साधु शोभनम् – इत्यमरः .
९. आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः – इत्यमरः।

१०. अस्मिन् पद्ये मालिनी छन्दः तथा च लक्षणम् –

ननमयययुतेयं मालिनी भोगिलोकैः – इति।

महाकविः कालिदासः :–

महाकविः कालिदासः संस्कृतभाषायाः सर्वश्रेष्ठः कविः नाटककारः चासीत्। अयं स्वकाव्येषु आत्मनः स्वभावं प्रतिबिम्बयति। तद्यथा – रघुवंशमहाकाव्ये प्रथमसर्गे स्वविनम्रतां प्रकटयति – **उडुपेनास्मि सागरम्** इति। बहवः ग्रन्थकर्तारः कालिदासस्य प्रशंसां कृतवन्तः। उदाहरणार्थम् – राजशेखरः, दण्डी, बाणः (हर्षचरिते १.१६), तिलकमञ्जरी (२५), आर्यासप्तशती (३५), सोड्ढलः, कृष्णभट्टः, सोमेश्वरः इत्यादयः। अस्य महाकवेः सुप्रसिद्धं मेघदूतकाव्यं टिबेट् सिंहलीभाषयोः प्राचीनकाले एव अनूदितम् । अतः प्राचीनकवयः अमुं **कविकुलगुरुः** इति उपाधिना विभूषितवन्तः।

कालिदासस्य जीवनवृत्तान्तः :– कविरयं कुत्रापि स्वविषये नोट्टङ्कितम्।

कालिदासस्य कृतयः :– चत्वारि श्रव्यकाव्यानि त्रीणि नाटकानि च विलसन्ति।

१. रघुवंशम्	२. कुमारसम्भवम्
३. मेघदूतम्	४. ऋतुसंहारम्

त्रीणि नाटकानि :–

१. मालविकाग्निमित्रम्
२. विक्रमोर्वशीयम्
३. अभिज्ञानशाकुन्तलम्

तत्र कुमारसम्भवमहाकाव्यं प्रसिद्धं वर्तते। अस्य काव्यस्य १७ सर्गेषु प्रथमसर्गात् अष्टमसर्गपर्यन्तभागमेव कालिदासेन रचितमिति विमर्शकाः अभिप्रयन्ति।

कुमारसम्भवमहाकाव्यस्य प्रसिद्धटीकाकाराः :–

१. मल्लिनाथः	२. कृष्णपतिशर्मा	३. कृष्णमित्राचार्यः
४. गोपालानन्दः	५. गोविन्ददासः	६. चरित्रवर्धनः
७. जिनभद्रसूरिः	८. नरहरिः	९. प्रभाकरः
१०. बृहस्पतिः	११. भरतसेनः	१२. भीष्ममिश्रः
१३. मुनिमतिरत्नः	१४. रघुपतिः	१५. वत्सः अथवा व्यासवत्सः
१६. आनन्ददेवः	१७. वल्लभदेवः	१८. विन्ध्येश्वरी प्रसादः
१९. हरिचरणदासः	२०. नवनीतराममिश्रः	२१. भरतमल्लिकः
२२. जयसिंहः	२३. लक्ष्मीवल्लभः	२४. दक्षिणावर्तनाथः
२५. विद्यामाधवः	२६. नन्दगोपालः	२७. सीतारामः
२८. नारायणः	२९. हरिदासः	३०. अरुणगिरिनाथः
३१. गोपालदासः	३२. तर्कवाचस्पतिः	३३. सरस्वतीतीर्थः
३४. रामपारसः	३५. जीवानन्दविद्यासागरः	३६. कुमारसेनः – इत्यादयः।

श्रीमहाकविकालिदासप्रणीतम्

कुमारसम्भवम्

कुमारसम्भवमहाकाव्यस्य प्रथमसर्ग (१–६०) वृत्तान्तकथा :–

कुमारसम्भवमहाकाव्यस्य प्रथमसर्गे शिवनिवासस्थानस्य हिमालयस्य मनोहरं वर्णनं विद्यते। तत्र प्रथमम् – गिरिराजहिमालयस्य ऐश्वर्यवर्णनम्, तस्य मेनया सह पाणिग्रहणम्। मैनाकजन्मवर्णनम्। पितृकृतहरानादरकारणात् योगेन शरीरत्यागोत्तरं सतीदेव्या हिमालयगृहे जन्मवर्णनम्। तस्या नामकरणम्। तस्याः शरीरशोभावर्णनम्। महर्षेर्नारदस्य हिमवद्गृहे समागमनम्। नारदकर्तृकशिवपार्वतीविवाह–चर्चाभिधानम्। पत्नीवियुक्तस्य हरस्य गिरिराजशिखरप्रदेशे तपश्चर्यावर्णनम्। तस्य पार्वतीकर्तृकं परिचरणम्।

द्वितीयसर्ग–वृत्तान्तकथा :–

तारकासुरेण पीडिताः देवाः ब्रह्मणः सकाशं गच्छन्ति। तारकासुरवधाय तत्पीडितेन्द्रादिदेव–कर्तृकब्रह्मस्तुतिः। सुरकर्तृकस्तुतिप्रसन्नीभूतेन ब्रह्मणा कार्तिके तारकविनाशकत्वारोपणम्। हरगौर्योः संयोगाय कर्तव्यनिश्चयः। महादेवस्य समाधिभङ्गाय सुरेन्द्रकर्तृकं स्मरस्य स्मरणम्। स्मरागमनञ्च।

एवञ्च अस्मिन् सर्गे ब्रह्मा तारकासुरवधोपायं सूचयति। 'शिवस्य वीर्यात् उत्पन्नः सेनारूपः कुमार एव तारकासुरं संहृत्य, देवानां समस्यां दूरीकरोति' – इति।

कुमारसम्भवमहाकाव्ये प्रथम/द्वितीयसर्गसूक्तयः :–

तत्र प्रथमाङ्के हिमाद्रेः सौभाग्यवर्णनसन्दर्भे –

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
१. **एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।। १.३।।**

अनन्तरत्नानां कारणीभूतस्य हिमालयस्य हिमं न सौन्दर्यविघातकं जातम्। यद्यपि स्वल्पः दोषः अमितगुणसान्निध्यात् न अन्तर्लीयते एव, तथापि कश्चित् इन्दोः कलङ्कादिवत् सौन्दर्यगुणवर्धकमेव भवति। इन्दोः कलङ्कः इन्दुकिरणेषु यथा अभिभूयते (निमज्जति – गायब् होता है।) तथा हिमरूपदोषः हिमालयस्य गुणाधिक्ये अभिभवति। अर्थात् हिमरूपदोषस्य कारणात् रत्न–औषधादिरूपसर्वरम्यवस्तुनः संरक्षणं सिद्ध्यति इति द्योतयति कविः।

२. शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।। २. ४०।।

३. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।। २.५५।।

दशाङ्कप्रश्नाः

१. १. इन्द्रादिदेवाः ब्रह्मणः सत्यं मनोहरं च स्तुतिम् कथम् अकुर्वन् ?

२. इन्द्रादिदेवैः कृतं ब्रह्मणः स्तुतिप्रकारं विवृणुत।

३. तारकासुरेण पीडिताः इन्द्रादिदेवाः कुत्र गतवन्तः ? कथं प्रार्थितवन्तः ?

४. देवगणैः ब्रह्मणः स्तुतिः कथमासीत् ? लिखत।

कविपरिचयः :–

संस्कृतसाहित्ये कालिदासः **महाकविः** इति, **कविकुलगुरुः, उपमाकालिदासः** इति च प्रसिद्धो विद्यते। अयम् ईसवीयपूर्वं प्रथमशतके आसीदिति विमर्शकाः अभिप्रयन्ति। अयं महाकविः **रघुवंशम्, कुमारसम्भवम्** इति महाकाव्यद्वयम्, **मेखसन्देशः** इति एकं खण्डकाव्यम्, **ऋतुसंहारः** इति च गीतिकाव्यम्, **अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्** इति त्रीणि नाटकानि च व्यरचयत्।

कुमारसम्भवमहाकाव्यपरिचयः :–

कालिदासमहाकाव्यद्वये **कुमारसम्भवम्** अन्यतरम्। अस्मिन् सप्तदश सर्गाः विलसन्ति। शिवपार्वत्योः सङ्गमः, कार्तिकेयस्य जननम्, तारकासुरस्य संहारश्च अत्र समुपवर्णितः प्रधानकथाभागः विद्यते।

द्वितीयसर्गप्रधानकथा –

तारकासुरेण पीडितानाम् इन्द्रादिदेवानां ब्रह्मणः सकाशगमनम्, तारकासुरवधाय तत्पीडितेन्द्रादिदेवैः कृता ब्रह्मस्तुतिः, सुरकर्तृकस्तुत्या प्रसन्नीभूतेन ब्रह्मणा कार्तिके तारकविनाश–कत्वारोपणम्। हर–गौर्योः संयोगाय कर्तव्यनिश्चयः। महादेवस्य समाधिभङ्गाय सुरेन्द्रकर्तृकं स्मरस्य स्मरणम्। स्मरागमनञ्च – अत्र समुपवर्णिता।

एवञ्च अस्मिन् सर्गे ब्रह्मा तारकासुरवधोपायं सूचयति – 'शिवस्य वीर्यात् उत्पन्नः सेनारूपः कुमार एव तारकासुरं संहृत्य, भवतां (देवानां) समस्यां दूरीकरोति' – इति।

इन्द्रादिदेवैः कृतः ब्रह्मणः स्तुतिप्रकारः :–

यस्मिन् समये पार्वती सदाशिवस्य सेवां कुर्वती आसीत् तस्मिन् समये तारकासुरेण पीडिताः देवाः इन्द्रं प्रतिनिधीकृत्य, ब्रह्मलोकम् अगच्छन्।

तारकासुरस्य भयात् परिक्षिणमुखकान्तियुक्तानां तेषां देवानां पुरतः ब्रह्मदेवः एवं प्रत्यक्षोऽभूत्, यथा प्रातःकाले मुकुलितपद्मयुक्तानां तटकानां सम्मुखम् उदीयमानो सूर्यः प्रत्यक्षो भवति तथा।। ब्रह्मदेवस्य प्रकटानानन्तरम् ते सर्वे देवाः सर्वतो मुखम्, वागीशम्, सर्वस्य धातारं तं ब्रह्मदेवं प्रणामपूर्वकम् अर्थयुक्तवचसा एवं तुष्टुवुः –

"हे भगवन्! एतस्मात् जगत्सृष्टेः प्राक् त्वं केवलात्मा आसीत्। अतः केवलात्मने तुभ्यं नमः। तस्मात् अनन्तरं सृष्टिप्रवृत्तिकाले सत्त्व-रजः-तमोरूपगुणविभागाय उपाधिभेदं प्राप्तवते ब्रह्म-विष्णु-रुद्ररूपत्रिमूर्तिस्वरूपाय तुभ्यं नमः।

हे भगवन्! अज! आपाम् सृष्टेः अनन्तरं तस्मिन् जले त्वया अमोघं बीजं निक्षिप्तम्। तस्मात् कारणात् एतत् चराचरात्मकं जगत् उत्पन्नम्। अतः लोकः अपि भवन्तं 'विश्वस्य उत्पत्तेः कारणं परमेश्वरेण निक्षिप्तः बीज एव' इति गीयते ।।

हे भगवन्! सृष्टेः प्राक् केवलात्मा भवान्, सृष्टेः पश्चात् हरि-हरहिरण्यगर्भरूपैः त्रिभिः अवस्थाविशेषैः आत्मनः महिमानं प्रकटयन्, जगतः प्रलयस्य, संस्थितेः, सृष्टेश्च कारणतां भजते।

हे भगवन् ! यदा भवतः कृते स्रष्टुम् इच्छा वर्तते तदा आत्मनः शरीरस्य स्त्री-पुरुषभागौ अभवताम्। अतः स्त्री पुरुषश्च द्वावपि भवतः समानभागौ स्तः। अस्मात् कारणात् तौ द्वावपि उत्पत्स्यमानसृष्टेः माता पितरौ कथ्येते।

हे भगवन्! आत्मनः जीवने कालपरिणामस्य रात्रिः इति दिवः इति चेति द्वौ विभागौ आत्मनः स्वप्न-अवबोधौ स्तः। तथा तौ द्वावपि एतस्य जगतः सृष्टेः प्रलयं, प्रबोधं च कथ्येते।। हे भगवन् भवान् स्थावरजङ्गमात्मकः अस्य जगतः (योनिः) कारणभूतः अस्ति। किन्तु स्वयं भवान् (अयोनिः) कारणरहितः अस्ति। (भवतः किमपि कारणं नास्ति।) भवान् जगतः अन्तकः अस्ति। किन्तु भवान् स्वयं निरन्तकः अस्ति। (किन्तु भवतः अन्तकः कोपि नास्ति।) एवं भवान् अस्य विश्वस्य आदौ अवश्यं वर्तते एव। परन्तु स्वयं भवान् अनादिः वर्तते। भवान् अस्य सृष्टेः ईश्वरः विद्यते। किन्तु स्वयं निरीश्वरः विद्यते। (भवतः ईश्वरः कोऽपि न विद्यते एव।)।

हे भगवन्! भवान् लोकानुग्रहार्थं ब्रह्मस्वरूपात् उत्पत्स्यमानम् आत्मानं स्वयं जानाति। तथैव आत्मानं स्वयमेव स्वात्मस्वरूपे सृष्टिं करोति। एवम् आत्मनः अधिष्ठानमपि भवानेव अस्ति। सामर्थ्यकारणात् स्वयमेव स्वात्मनि प्रलीनो भवति। भवतः प्रपञ्चस्य इव ज्ञानोत्पत्ति-लयेषु अधिकापेक्षा नास्ति।

हे भगवन्! त्वं सरित्समुद्रादिवत् द्रवः (रसात्मकः) असि, पृथवी-पर्वतादिवत् कठिनः असि। घटादिपदार्थवत् इन्द्रियग्राह्यः स्थूलरूपः असि, परमाण्वादिवत् अतीन्द्रियः चासि। कार्पासादिवत् लघुः तथा पर्वतादिवत् भवान् अचलोऽपि विद्यते। भवान् घटादिवत् कार्यरूपेण व्यक्तः तथा कार्याणां कारणरूपत्वेन अव्यक्तोऽपि वर्तते। एवम् अणिमाद्यष्टसिद्धिषु भवतः यथेष्टं प्राकाम्यं भवति। अतः सर्वं त्वमेव असि।।

हे भगवन्! यस्याः वेदरूपवाण्याः उद्घातः (आरम्भः) प्रणवः (ॐकारः) अस्ति तथैव यस्याः वाण्याः उच्चारणम् उदात्त-अनुदात्त-स्वरितरूपैः त्रिभिः स्वरैः उच्चरितो भवति, यया वाण्या ज्योतिष्टोमादियज्ञानां निर्वहणं भवति, अपि च येषां यज्ञानां फलं स्वर्गादिः अस्ति तास्याः वेदवाण्याः भवान् प्रभवस्थानम् (मूलकारणम्) विद्यते।। १२।।

हे भगवन्! सांख्यस्मृतिकाराः भवन्तं भोग-अपवर्गरूपपुरुषार्थाय प्रवर्तनीं मूलप्रकृतिम् आमनन्ति। अपि च पुरुषार्थाय प्रवर्तनरूपं प्रकृतिस्वरूपं त्वामेव तस्याः प्रकृतेः साक्षित्वेन दर्शकः कूटस्थः पुरुषः इत्यपि विन्दन्ति।

हे भगवन्! भवान् अग्निष्वात्तपितॄणाम् अपि तर्पणीयः पिता अस्ति, इन्द्रादिदेवानामपि यजनीयः देवः अस्ति। मायासंवलितब्रह्मणः अपि परब्रह्मस्वरूपः विद्यते। जगतः सृष्टिकर्तॄणाम् मरीच्यादीनाम् प्रजापतीनाम् अपि सृष्टिकर्ता वर्तते। किन्तु त्वत्तः परः कोऽपि नास्ति।

हे भगवन्! त्वमेव पशुपुरोडाशादियज्ञसाधनद्रव्यस्वरूपः, तथा यजमानोऽपि त्वमेव असि। त्वमेव अन्नादिरूपेण भोज्यपदार्थः तथा तस्य भोज्यपदार्थस्य भोक्ता अपि त्वमेव असि। त्वमेव साक्षात् घटादिकार्यवस्तु असि, तथा त्वमेव तस्य साक्षात्कारे कर्ता अपि। एतावदेव न ध्याता अपि त्वमेव तथा तस्मात् परं ध्येयम् अपि त्वमेव असि।। १५।।

इत्येवंप्रकारेण इन्द्रादिदेवाः ब्रह्मदेवं प्रति सत्यं मनोहरं च स्तुतिम् अकुर्वन्।

२. १. देवेभ्यः यथार्थाः हृदयङ्गमाः स्तुतीः श्रुत्वा वेधाः किमिति प्रत्युवाच ?

तारकासुरेण पीडिताः इन्द्रादिदेवाः ब्रह्मदेवस्य सकाशम् अगच्छन्। अथ इन्द्रादिदेवैः कृताः सत्याः मनोहराः च स्तुतीः श्रुत्वा प्रसन्नः ब्रह्मदेवः इन्द्रादिदेवैः सह इत्थम् अब्रवीत्। (तदा चतुष्टयी शब्दानां प्रवृत्तिवत् पुराणस्य कवेः तस्य चतुर्मुखसमीरिता सती गीः चरितार्था आसीत्।) तद्यथा –

हे अत्यन्तपराक्रमशालिनः देवाः! स्वकीयान् अधिकारान् स्वसामर्थ्येन धृतवतोऽपि सर्वे च युगवत् समागतेभ्यः युष्मभ्यं सुस्वागतम्।

हे वत्साः ! यथा नीहारेण नक्षत्रद्युतिः मलीना भवति तद्वत् युष्माकमपि मुखानि पूर्वमिव स्वाभाविककान्तिम् न धृत्वा, मलिनानि सञ्जातानि। अस्य कारणं किम् भवेत्। अथ विंशतितमश्लोकात् षड् विंशतितमश्लोकपर्यन्तम् (२०-२६) एकैकस्य देवस्य शक्तिहीनतां मुखम्लानताञ्च ब्रह्मा वर्णयति। तत्र प्राधान्यात् इन्द्रस्य मुखम्लानतावस्थां प्रदर्शयति–

इन्द्रस्य अवस्था :– इन्द्रस्य तेजसः नष्टकारणात् चित्र-विचित्रप्रभाभिः हीनत्वेन दृश्यमानम् एतत् इन्द्रस्य वज्रायुधम् हतश्री इव किमर्थं दृश्यते ?।। २०।।

वरुणस्य अवस्था :– किन्तु पुरोदृश्यमानः शत्रूणां संहारकः वरुणदेवस्य हस्तयोः अलङ्कृतः अयं पाशः गारुडमन्त्रेण तेजोविहीनं प्राप्य, सर्पवत् दैन्यत्वं गच्छति।

कुबेरस्य अवस्था :– गदाविहीनस्य कुबेरस्य हस्तः कर्तितशाखाद्रुम इव मानसिकं क्षीणत्वं तस्य शत्रुकृतं पराभवं सूचयति।

यमराजस्य अवस्था :– यमधर्मराजोऽपि अस्तमिततेजसा स्वदण्डेन पृथिव्यां आलिखन् शान्तोल्मुक इव अस्य निष्क्रियता क्लैब्यं प्रकटयति।

द्वादशादित्यानाम् अवस्था :– तेजसां क्षयेण अत्यन्तं शीतलाः सञ्जाताः एते द्वादश आदित्याः, चित्रलिखिताः आदित्याः इव नेत्रदर्शनं विदधाति केन हेतुना ?

मरुताम् अवस्था :– एतेषां वायूनाम् वेगव्याकुलता कारणेन एवं भग्नत्वं दृश्यते यथा उच्चप्रदेशस्य अवरोधेन जलप्रवाहः स्थगितो भूत्वा, प्रतीपं प्रवहति तद्वत्।

एकादश रुद्राणाम् अवस्था :– पराजयजन्येन अवनतजटाजूटेषु मूर्धनि चन्द्रकिरणान् लम्बयन्तः एते एकादश रुद्राः अपि स्वकीयहुङ्कारनाशं सूचयन्ति।

एवं मुखविकृत्यादीनां हेतुं स्वयमेवं कथयति –

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः।। २७।।

लब्धावकाशानि **मा हिंस्यात् सर्वभूतानि** इत्येवमादीनि सामान्यशास्त्राणि, **अग्नीषोमीयं पशुमालभेत** इत्येवमादिभिः वैदिकापवादशास्त्रैः (निरवकाशैः विशेषशास्त्रैः) बाधितत्वात् सङ्कुचितमनस्काः इव भवन्तः देवाः उत्सर्गशास्त्रवत् प्रथमं लब्धप्रतिष्ठाः, तदनन्तरं प्रबलशत्रुभिः (अपवादशास्त्रैः) पीडितत्वात् – (भवन्तः) कृतप्रतिष्ठाभङ्गाः सञ्जाताः किम् इति। (तस्य प्रतिष्ठां त्यक्तवन्तो वा ?)

अथ तत्र कर्तव्यांशं पृच्छन् स्ववचनम् उपसंहरति –

अतः सम्भूय आगताः हे वत्साः! यूयं वदथ मत्तः किं इच्छथ? यतः सृष्टिनिर्माणकार्यभारः मयि संस्थापितः। किन्तु निर्मितसृष्टेः संरक्षणकार्यभारः युष्मासु एव संस्थापितः। अतश्च मदपेक्षा नास्ति – इति।

३. १. ब्रह्मणः वचनानन्तरम् इन्द्रनियोगेन बृहस्पतेः प्रतिवचनप्रस्तावम् उपवर्णयत।

२. कालिदासप्रतिपादनानुसारं तारकासुरस्य उपप्लवं लिखत।

एवं पितामहस्य वचनं श्रुत्वा, अनन्तरं मन्दमन्दवायोः प्रेरणया शोभितकमलसमूहानां इव सुशोभितनेत्रैः इन्द्रः गुरुं बृहस्पतिम् वक्तुं अवकाशो दत्तवान् ।। २९।।

इन्द्रस्य सहस्रनेत्रापेक्षया विशिष्टद्विनेत्रात्मकः सः बृहस्पतिः अञ्जलिं बद्ध्वा ब्रह्माणम् इदं वक्ष्यमाणं वचः जगाद।

हे भगवन् त्वं यद् ब्रवीषि तत् सत्यमस्ति। अस्माकं स्थानं शत्रुभिः आक्रान्तम्। हे प्रभो! सर्वान्तर्यामितया विश्वव्यापी भवान् किं न लोकवृत्तन्तं जानाति।

हे भगवन् ! भवतः सकाशात् वरं लब्ध्वा महादानवः तारकासुरः उद्धतो भूत्वा सकललोकानां विनाशाय धूमकेतुनक्षत्र इवोत्पन्नः अस्ति।। ३२।।

अथ एकैकस्य देवस्य तारकासुरानुकूल्यं वर्णयति –

सूर्यस्य आनुकूल्यम् :– सूर्यः तारकासुरनगरे यावन्मात्रेण आतपेन वापीपद्मविकासः भवति तावन्मात्रमल्प–परिमाणमेव आतपं प्रसारयति। तीक्ष्णकिरणोऽपि सूर्यः तस्य तारकासुरस्य भीत्या तत्पुरे मन्दोष्णः सन् प्रकाशते।

चन्द्रस्य तारकासुरसेवा :– चन्द्रमाः कृष्णपक्षेऽपि षोडशभिः परिपूर्णः सन् तारकासुरं सेवते केवलां शङ्करशिरसि वर्तमानां कलां न स्वीकरोति।

वायोः अनुसरणम् :– वायुदेवः तारकासुरस्य उद्याने अकारणतया यस्य कस्यापि पुष्पस्य पातः न भवेत् इत्यतः तारकासुरेण भयसन्त्रस्तः सन् तस्य समीपे व्यजनपवनात् अधिकं वायुः न वाति।

षट् ऋतूणाञ्च सेवा :– शीतलं उष्णादिकं च स्वं स्वं गुणं (धर्मं) परित्यज्य उद्यानपालकवत् सुमनसां सम्पानतत्पराः वसन्तादयः षड़ृतवः अन्यतमस्य ऋतोः पुष्पं न नाशयन्ति। अर्थात् एकदैव ते ऋतवः तारकासुरम् आराधयन्ति इति भावः।

समुद्रस्य आनुकूल्यम् :– समुद्रः तारकासुराय अत्यन्तश्रेष्ठरत्नानाम् उपाहारतया दातुं, जलान्तर्भागे परिपाकदशायै अपेक्षितं कालं प्रतीक्षमाणः तारकासुरभयात् यथाकथञ्चित् तादृक् समयं यापयति।

न केवसं भूतलनिवासिनां तदनुवृत्तिः किन्तु पातालतलवर्तिनां वासुकिप्रभृतीनां नागानामपि इत्याह–

वासुकिप्रमुखानां सर्पाणाञ्च सेवा :– रात्रिसमयेषु वासुकिप्रमुखाः सर्पाः स्वस्वफणाः उन्नतं कृत्वा प्रत्येकस्मिन् प्रदेशे वायुना यथा निर्वापणं न सम्भवति तथा प्रदीपानि च भूत्वा, फणामणिभिः अन्धकारं दूरीकुर्वन्तः तारकासुरं संसेवन्ते।

इह त्रैलोक्याधिपतेः इन्द्रस्यापि सेवाप्रकारः :–

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः।। ३९।।

देवराजा इन्द्रोऽपि तारकासुरस्य प्रसन्नतायै प्रतिक्षणं दूतान् द्वारीकृत्य बहुमूल्यरत्नानि उपाहरतया सम्प्रेष्य, शत्रुभूतं तं तारकासुरं सेवते।

उक्तप्रकारेण सूर्य–शशि–महद्–उदधि–नाग–महेन्द्रैः निरन्तरमाराध्यमानोऽपि स तारकासुरः त्रिलोकं पीडयति। यतो हि दुर्जनः प्रत्यपकारेणैव शान्तो भवेत् न तु प्रत्युपकारेण। प्रत्युपकारेण गर्वितो भवति।

तारकासुरकृतनन्दनवनवृक्षनाशः :– देवाङ्गनाः सुकुमारकरैः कर्णावतंसार्थं (कर्णभूषणार्थं) सदयं त्रोटितकिसलयान् नन्दनवनवृक्षान् तारकासुरः निर्दयया छित्वा पातयति।

देवानां दारापहरणम् :–

वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः।
चामरैः सुरबन्दीनां बाष्पसीकरवर्षिभिः।। ४२।।

संसुप्तः सः तारकासुरः बलात्कारेण हृतानां देवाङ्गनानां पतिविरहदुःखदीर्घनिःश्वासवायु–समानवायुभिः भूयः भूयः अश्रुमार्जनासक्ताभ्यां कराभ्यां व्यजनग्रहणात् अश्रुबिन्दुवर्षणशीलैः चामरैः वीजितः भवति।

धनापहरणम् :– मेरुपर्यन्तम् अनुदिनं गच्छतां सूर्याश्वानां खुरैः चूर्णितानि सुमेरोः शिखराणि तेन तारकासुरेण उत्पाट्य स्वगृहेषु क्रीडापर्वताः रचिताः सन्ति।

अथ देवोपभोगसाधनानां सुवर्णकमलानाम् अपहरणमाह –

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम्।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्।। ४४।।

तारकासुरः स्वर्गङ्गासुवर्णकमलानि उत्पाट्य स्ववापी रचनायाम् उपयुङ्क्तवान्। ततश्चेदानीं दिङ्मातङ्गमदजलकलुषीभूतं मन्दाकिनीजलमेवावशिष्टमस्ति। तारकासुरस्य आक्रमणभीत्या विमानमार्गे प्रहतीभूते सति स्वर्गवासिभिः देवैः लोकदर्शनप्रेम न प्राप्यते।

भोजनापहरणम् :– मायावी तारकासुरः यज्ञकर्तृभिः यज्ञानुष्ठाने समर्पितं हव्यं पश्यतामेव अस्माकं वह्निमुखादपहरति।

उच्चैश्श्रवसः अवहरणम् :– किञ्च स तारकासुरः इन्द्रस्य बहुकालसञ्चितं मूर्तिमत् यशः इव प्रोन्नतम् उच्चैःश्रवः अभिधेयं घोटकरत्नम् अपहृतवान्।

तर्हि सामाद्युपायाः कथं न प्रयुक्ताः इति ब्रह्मणा पृष्टे सति पुनः बृहस्पतिः –

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके।। ४८।। इति समादधौ।

सन्निपातदोषजन्ये ज्वरादौ महावीर्याणि भेषजानि इव अस्माकं देवानां सर्वे सामादयः उपायाः क्रूरे तस्मिन् तारकासुरे निष्फला भवन्ति।। ४८।।

अपि च तत्र जयाशायाः वैफल्यम् कथयति यत् – यस्मिन् सुदर्शनचक्रे अस्माकं देवानां **नूनं वयमनेन जेष्यामः** इति विजयाशा आसीत्, शिलातलसमकर्कशे तारकासुरकण्ठे प्रक्षिप्तेन तेन विष्णोः सुदर्शनचक्रेण तत्कण्ठकाठिन्यान्निर्गतया अनलज्वालयाऽस्य ग्रीवायां कण्ठभूषणमर्पितम् इव – इति।

तारकासुरस्य हस्तिनां दौर्भाग्यस्थितिं वर्णयति – इन्द्रगजस्य ऐरावतस्य पराजयकर्तारः तारकासुरगजाः दर्पकण्डू दूरीकरणार्थं पुष्करावर्तकादिषु महामेघेषु भूयो भूयो दन्तप्रहारं कुर्वन्ति।

अथ तारकासुरस्य प्रतीकारं कर्तुं प्रार्थयते बृहस्पतिः –

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये।
कर्मबन्दच्छिदं धर्मं भवस्येव मुमुक्षवः।। ५१।।

हे स्वामिन्! यथा मुमुक्षवः जगतो निवृत्तये निवृत्तिलक्षणं धर्मं वाञ्छन्ति तथैव वयं तारकासुरस्य विनाशाय देवानां सेनायाः नायकं निर्मातुम् इच्छामः – इति।

अपि च तत्सेनानीसृष्टेः प्रयोजनं वितनोति –

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम्।। ५२।।

हे प्रभो! यादृशेन सेनापतिना देवराजः पूर्णां शक्तिं सम्पाद्य दुर्जयो भूत्वा स्वयमेव बन्दीभूताम् इव वैरिवशवर्तिनीं देवलक्ष्मीं प्रत्यानेतुं शक्तो भवेत्, तादृशः सेनापतिः त्वया स्रष्टव्यः – इति।

४. १. बृहस्पतेः वचनानन्तरं ब्रह्मणः प्रतिवचनप्रकारं वर्णयत।

वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा।। ५३।।

बृहस्पतेः वचनानन्तरं ब्रह्मा यां वाणीमुवाच सा मेघगर्जिताननन्तरम् जायामानां वृष्टिमपि जितवती। तद्यथा –

''हे देवाः! युष्माकं सेनानायकप्राप्तिरूपो मनोरथः सिद्धिं गमिष्यति। किन्तु कार्यसाधनसमर्थः कियान् कालः प्रतिपाल्यताम् युष्माकम्। कार्यसम्पादनाय अहं स्वांशेनात्मानं नव स्रक्ष्यामि।

यथा स्वयं संवर्धितस्य विषवृक्षस्य अपि छेदनम् अनुचितं वर्तते, तथैव मया दत्तवरदानेन वर्धितस्य तारकासुरस्य नाशः मयैव न कर्तव्यः।

स्वयं तस्य हनने आत्मनः प्रतिज्ञाभङ्गोऽपि स्यात् इत्यत्र निगदति –

वृतं तेनेदमेव प्राङ्म्या चास्मै प्रतिश्रुतम्।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः।। ५६।।

सः तारकासुरः स्वकीयेन उग्रेण तपसा सन्तुष्टः मां प्रति वरदानसमये – **'देवैः अवध्यत्वम्'** वरं प्रार्थितवान्। मया च तथाऽस्तु इति प्रतिज्ञातम्। यदि तस्मिन् समयेऽहं तेनाभ्यर्थितं वरं न अदास्यम्, तर्हि नूनं तन्मूर्धनो निर्गता वह्निज्वाला सकलान् अपि चराचरलोकान् भस्मसात् अकरिष्यत् – इति।

युद्धे तत्परं संग्रामविशारदं तारकासुरं (जेतुं) क्वचित् स्त्रीयोनौ निषिक्तस्य शिववीर्यस्यांशाद्विनाऽन्यः कः सोढुं शक्नुयात् ? न कोऽपि शक्नोति इत्यर्थः।

स हि देवो भगवान् शङ्करः देशकालाद्यनवच्छिन्नं परमोत्कृष्टं तेजः अस्ति। अपि च तच्च तेजः अविद्यायाः पारं स्थितश्चास्ति। यतः भगवान् नारायणः अहं ब्रह्मा च उभौ आवां शिवस्य महिम्नः समृद्धिम् इयत्तया परिच्छेत्तुं न समर्थौ बभूव।

सम्प्रति भगवतः शङ्करस्यांशोत्पत्तावुपायं दर्शयति –

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। ५९।।

योग्यतमसेनापतेः उत्पत्त्या तारकासुरस्य वधाय सम्प्रार्थ्यमानाः हे देवाः यूयम् यथा अयस्कान्तमणिः लोहाकर्षकं भवति तद्वत् पार्वतीसौन्दर्यमणिना राग–द्वेषरहितस्य निर्गुणेशस्य हृदयम् आक्रष्टुं यत्नो विधीयन्ताम् – इति।

उभाभ्याम् आवाभ्यां शिव–ब्रह्मभ्याम् आहितम् वीर्यम् वोढुं सा पार्वती, मे च तदीया जलमयी मूर्तिः इत्युभे एव नार्यौ समर्थे स्तः। नान्याः काश्चन स्त्रियः समर्थाः।

एवं कृते सति युष्माकं कार्यसिद्धिः अवश्यं भविष्यति इत्यत्राह –

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः।। ६१।।

तस्य शिवस्यात्मजः भवतां सेनापतिर्भूत्वा निजपराक्रमाधिक्यात् तारकासुरेण बलादपहृत्य वन्दीकृतानां देवाङ्गनानां संश्लिष्टान् कचान् विश्लेषयिष्यति – इति।

जगत्स्रष्टा ब्रह्मा पूर्वोक्तप्रकारेण देवान् कथयित्वा अन्तर्हितो बभूव। देवा अपि अनन्तरं करणीयं मनसि निश्चित्य स्वस्थानं स्वर्लोकं गतवन्तः।।

अथ गौरी–शङ्करसङ्गमोपायानुष्ठानरूपम् उत्तरसर्गार्थं बिन्दुमुपस्थापयति –

तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः ।
मनसा कार्यसंसिद्धौ त्वरा द्विगुणरंहसा।। ६३ ।।

शचीपतिः इन्द्रः स्वर्गे विधास्यमानम् उपायानुष्ठानं देवैः सह सम्यगवधार्य शिव–गौरीसङ्गमरूपकार्यसिद्धौ त्वरया द्विगुणिताभिलाषेण मनसा स्वसमीपे कन्दर्पं सस्मार।

अथ उत्तरसर्गकथासम्बन्धार्थं मदनस्यागमनं दर्शयति –

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा।। ६४।।

अथ इन्द्रकर्तृक–मदनस्मरणानन्तरमेव सः मदनः सौम्यस्त्री भ्रूकुटीकोटिकोमलाग्रभागं स्वकीयं चापं स्वप्रियाकङ्कणकोटिचिह्निते स्वकण्ठे संवेष्ट्य त्रिभुवनविजये सहायकस्य वसन्तस्य हस्ते आम्रमञ्जरीबाणं च संन्यस्य कृताञ्जलिः भूत्वा महेन्द्रसमीपे उपस्थितोऽभूत्।

५. १. देवाः तारकासुरं कथम् अनुकूलयन्तः आसन् ? अथवा

२. विविधानां देवानां तारकासुरसेवाप्रकारं वर्णयत।

तारकासुरेण पीडिताः देवाः ब्रह्मदेवस्य सकाशम् अगच्छन्। तत्र ब्रह्मदेवश्च देवानां स्तुतीः श्रुत्वा तेषाम् आगमनकारणम् अपृच्छत्। तदा प्रत्युत्तरं दातुम् इन्द्रः बृहस्पतये सूचितवान्। तदा बृहस्पतिः ब्रह्माणं प्रति एवम् अवोचयत्।

हे देव! भवता वरं लब्ध्वा गर्वितः तारकासुरः लोकानां धूमकेतुरिव वर्तते। सः लोकान् पीडयति। सर्वेऽपि देवाः तस्य अनुकूलतया एव प्रवर्तन्ते। तत्र –

१. सूर्यः :– तारकासुरस्य नगरे यावन्मात्रेण आतपेन कमलानां विकासः भवति, तावदेव औष्ण्यं सूर्यः ददाति। अपि च सूर्यः स्वस्य पराक्रमं न दर्शयति। तारकासुरस्य भीत्या अत्यन्तमल्पम् औष्ण्यमेव प्रसारयति।

२. चन्द्रः :– चन्द्रः स्वकीयाभिः कलाभिः सर्वदा तारकासुरं सेवते। शङ्करस्य मौलौ विद्यमानाम् एकां कलां विहाय अन्याभिः सर्वाभिः कलाभिः चन्द्रः तारकासुराय ज्योत्स्नाम्, शीतलताञ्च ददाति।

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम्।। २. ३४।।

३. वायुः :– पुष्पाणि चोरितानि इति अपवादभयात् वायुदेवः तारकासुरस्य उद्यानात् प्रतिनिवृत्तः तालव्यजनात् यो वायुः आयाति, ततोऽपि अधिकेन वेगेन तारकासुरस्य सकाशे वायुः न वाति। वायुः तारकासुरं मन्देन वेगेन सेवते।

४. ऋतवः :– वसन्तादि–ऋतवः सर्वेऽपि तेषाम् आगमनक्रमं परित्यज्य तारकासुरस्य उद्याने उद्यानपालनवत् पुष्पाणां सङ्कलने एव श्रद्धालवः सञ्जाताः। एवम् ऋतवः सर्वेऽपि सर्वदा तं सेवन्ते।

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते।। ३६।।

५. समुद्रः :– तारकासुराय दातुं योग्यानि रत्नानि कदा वा समुद्रे निष्पद्यन्ते इति समुद्रः प्रतीक्षते। तारकासुराय रत्नानि देयानि इति चिन्तया एव सर्वदा समुद्रः तिष्ठति।

६. सर्पाः :– वासुकिः इत्यादयः प्रमुखाः सर्पाः स्वकीयेषु शिरस्सु विद्यमानैः मणिभिः रात्रौ प्रकाशं दत्वा तारकासुरं सेवन्ते। एते सर्पाः रत्रौ स्थिरप्रदीपाः इव तस्मै प्रकाशं ददति।

७. इन्द्रः :– देवेन्द्रोऽपि तारकासुरस्य अनुग्रहाभिलाषी सन् वारं वारं दूतानां द्वारा कल्पद्रुमाणां विभूषणानि प्रेषयति। तस्य अनुकम्पया एव प्रवर्तते।

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः।। ३९।।

एवं सर्वेऽपि देवाः यथाशक्तिः तारकासुरं सेवन्ते। तथापि तारकासुरः लोकत्रयं पीडयत्येव। दुर्जनः अपकारेणैव शान्तो भवति, न तु उपकारेण।

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।। ४०।।

इति बृहस्पतिः ब्रह्मदेवं प्रति विविधानां देवानां तारकासुरसेवाप्रकारम् अवदत्।

६. १. तारकासुरस्य दुष्कार्याणि विवृणुत। अथवा

२. तारकासुरः लोकान् कथं पीडयति स्म।

ब्रह्मदेवात् प्राप्तवरः तारकासुरः लोकान् पीडयति स्म । पीडां सोढुम् अशक्ताः देवाः सर्वेऽपि ब्रह्मलोकम् अगच्छन् । तत्र इन्द्रस्य आदेशेन बृहस्पतिः तारकासुरस्य कार्याणि ब्रह्मदेवाय अकथयत्। तथा हि –

हे भगवन् ! तारकासुरः भवतः अनुग्रहेण वरं प्राप्य धूमकेतुरिव त्रीन् लोकान् पीडयति। पूर्वं स्वर्गे उद्यानवृक्षाणां पल्लवाः देवतास्त्रीणां सुकुमारैः हस्तैः सदयं छेदिताः तासाम् अलङ्कारभूताः आसन्। परम् इदानीं ते एव वृक्षाः पतनस्य परिचिताः सञ्जाताः । तारकासुरेण स्वर्गोद्याने विद्यमानाः वृक्षाः सर्वेऽपि नाशिताः । तद्यथा बृहस्पतेः वचसि –

तेनामरवधूहस्तैः सदयालूनपल्लवाः।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः।। ४१।। इति।

आकाशमार्गे गच्छती सूर्याश्वानां खुरैः चूर्णितानि स्वर्णमयानि मेरुपर्वतस्य शिखराणि उत्पाट्य तारकासुरेण गृहे क्रीडापर्वतानां निर्माणम् अकरोत्।

आकाशगङ्गायां सम्प्रति दिग्गजानां मदजलेन कलुषितं जलमेव वर्तते। यानि **स्वर्णकमलानि** पूर्वं मन्दाकिन्याम् आसन् तान सम्प्रति तारकासुरगृहे दीर्घिकायां वर्तन्ते, तानि कमलानि उन्मूल्य अत्र स्थापितानि तारकासुरेण।

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम्।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्।। ४४।।

तारकासुरः कदाचित् आक्रमणं कुर्यात् इति भीत्या देवाः विमानैः विहारमेव न कुर्वन्ति। तेन आकाशमार्गाः शून्याः सञ्जाताः। सम्प्रति देवनाम् अन्यलोकानां दर्शनेच्छा न पूर्यते। यज्ञेषु यज्ञकर्मभिः दत्तं हव्यं सर्वमपि अग्निदेवस्य सकाशात् पश्यतां अस्माकं पुरतः एव तारकासुरः गृह्णाति।

यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः।। ४६।।

इन्द्रेण चिरकालात् सम्पादितायाः कीर्तेः मूर्तिमान् इव विराजमानः अश्वश्रेष्ठः उच्चैश्श्रवाः तारकासुरेण अपहृतः। अस्माकं जयाशा विष्णुचक्रे आसीत्। परं विष्णुचक्रमपि तत्कण्ठप्रहारसमये ज्वालां ददत् निर्वीर्यं भूत्वा तस्य कण्ठे माला इव स्थितम्।

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्।। ४९।।

अतः हे भगवन् ! तारकासुरस्य नाशाय एकं समर्थं सेनानायकं वयम् इच्छामः इति बृहस्पतिः ब्रह्माणं प्रार्थयामास।

७. १. आगतान् देवान् दृष्ट्वा ब्रह्मा किम् अपृच्छत् ?

२. तारकासुरेण पीडिताः देवाः आयुधानि च कथम् आसन् ?

ब्रह्मणा वरं प्राप्य गर्वितः तारकासुरः लोकान् पीडयति स्म। तं सोढुम् अशक्ताः देवाः ब्रह्मलोकम् अगच्छन्। तत्र च ब्रह्मणः स्तोत्रम् अकुर्वन्। अनन्तरं म्लानमुखान् देवान् दृष्ट्वा ब्रह्मा एवम् अवदत् –

सामर्थ्येन पराक्रमेण च भवताम् अधिकारान् सम्यक् निर्वहतां भवतां स्वागतम्। तुषारेण आच्छादितानि नक्षत्राणि यथा न प्रकाशन्ते, तथैव भवतां मुखान्यपि प्रकाशहीनानि वर्तन्ते किम् कारणमस्य? इन्द्रस्य वज्रायुधमपि कान्तिहीनं दृश्यते। वरुणस्य हस्ते विद्यमानः पाशोऽपि, गरुडेन नष्टसामर्थ्यः नागः इव दीनः दृश्यते।

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।। २१।।

कुबेरस्य हस्तः गदाभावात् छिन्नशाखः वृक्षः इव, मनसि निह्नमानं शत्रुणा कृतम् अपमानं सूचयति इव वर्तते।

यमोऽपि गततेजस्केन दण्डेन भूमिं समुल्लिखति। तस्य दण्डः भूलेखनेन अग्निरहिताङ्गार इव अतिसाधारणतां गतः।

यमोऽपि द्वादशादित्याः पराक्रमस्य नाशात् शीतलाः सञ्जाताः चित्तस्थाः अमिततेजोशालिनः अपि सामान्यतया द्रष्टुं योग्याः शीतलाश्च जाताः। किं कारणम् अस्य।

चतुर्दशानामपि वायूनां वेगस्य भङ्गः दृश्यते। एकादशरुद्राणामपि मस्तकाः हुङ्काररूपं विनष्टम् इव तेषां जटाजूटाः अवनताः। अत एव जटाजूटेषु चन्द्राः स्खलन्तः सन्ति।

हे वरुणाः भवन्तः भवतामपेक्षया बलवद्भिः कैरपि बाधिताः वा ? लोकानां सृष्टिः मया क्रियते। रक्षणं तु भवतां कर्तव्यम्। तादृशाः भवन्तः अत्र किं प्रार्थितुम् आगताः इति ब्रह्मा देवान् अपृच्छत्।

८. १. कालिदासकवितां पाठ्यांशमनुसृत्य विवृणुत।

२. उपमाकालिदासस्य सोदाहरणं प्रपञ्चयत।

–०–

कालिदासपरिचयः :–

कालिदासस्य कालः क्रीस्तोः पर्वम् प्रथमशताकम् इति केचन, ईसवीयप्रथमशतके आसीदिति अन्ये च विमर्शकाः अभिप्रयन्ति। परमयं क्रीस्तोः पूर्वम् प्रथमशताब्दीयः इति मतं बहुभिः अङ्गीक्रियते। कालिदासः कस्मिन् प्रदेशे जन्म प्राप्तवान् कस्य राज्ञः सकाशे आसीत् इत्यत्र निश्चयो नास्ति इतिहासविमर्शकेभ्यः।

कालिदासकृतयः :–

अयं महाकविः **रघुवंशम्, कुमारसम्भवम्** इति महाकाव्यद्वयम्, **मेघसन्देशः** इति एकं खण्डकाव्यम्, **ऋतुसंहारः** इति च गीतिकाव्यम्, **अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्** इति त्रीणि नाटकानि च व्यरचयत्।

प्रसिद्धिः :–

संस्कृतसाहित्ये कालिदासः **महाकविः** इति, **कविकुलगुरुः** इति, **उपमाकालिदासः** इति, **दीपशिखाकालिदासः** इति च प्रसिद्धो विद्यते।

उपमालङ्कारः :–

महाकविः कालिदासः उपमालङ्कारपोषणे निपुणः, एवं स्वरचनासु अस्य अलङ्कारस्य प्रयोगः बहुधा कृतत्वात् **उपमा कालिदासस्य** इति ख्यातिं प्राप्तवान्। शब्दार्थसौन्दर्यपोषकाणाम् आलङ्कारिकाणां काव्येषु प्राधान्यं भामहादिभिः अभ्युपगतम्। अलङ्कारेष्वपि उपमायाः स्थानं निरुपमम्।

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिका भेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ।।

इत्युपमालङ्कारः काव्यतत्त्वज्ञैः बहुधा प्रशंसितः। बहुषु अलङ्कारेषु रूपक-दीपकादिषु औपम्यमेव प्राणमित्यत्र नास्ति सन्देहः। प्रशंसनीयतमस्य उपमालङ्कारस्य, तन्मूलकाणाम् अलङ्काराणां च पोषणे कालिदासः सिद्धहस्तः। कालिदासविरचितग्रन्थेषु प्रायशः सहस्रशः श्लोकेषु शुद्धायाः उपमायाः विलासाः दरीदृश्यन्ते। उपमामूलकाणाम् अलङ्काराणाम् उदाहरणानि शतशो लक्ष्यन्ते। तथा हि –

उपमालङ्कारलक्षणम् :–

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।।

यत्र द्वयोः = उपमानस्य उपमेयस्य च, सादृश्यलक्ष्मीः = चारुसाम्यम् (सहृदयजनरञ्जकतया साम्यसौन्दर्यम्), उल्लसति = प्रकाश्यते (वर्ण्यते) तत्र **उपमालङ्कारः।**

इदमत्रावधेयम्। अत्र उपमानम् नाम अवर्ण्यवस्तु। उपमेयं च वर्ण्यवस्तु। **मुखं चन्द्रः इव सुन्दरम्** इत्यत्र **मुखम्** = वर्ण्यम् = उपमेयम् = विषयी च। **चन्द्रः =** अवर्ण्यम् = उपमानम् (प्रसिद्धम्) = विषयः च।

एवं च उपमालङ्कारे अङ्गचतुष्टयम् (उपमान–उपमेय–साधरणधर्म–इव) सम्भवति चेत् पूर्णोपमालङ्कारः। अयं च उपमालङ्कारः उपमेयोपमा–अनन्वय–प्रतीपाद्यलङ्कारेष्वपि भवति।

हे कृष्ण! तव कीर्तिः हंसी इव आकाशगङ्गायाम् अवगाहते।

अत्र वर्ण्यविषयः **कीर्तिः** उपमेयम्। **हंसी** च अवर्ण्यविषयः उपमानम्। **इव** उपमावाचकशब्दः। **अवगाहनं** च समानधर्मः। एवञ्च उपमानस्य उपमेयस्य च अत्र चारुसाम्यम् उल्लसति (हंस्याः कीर्तेश्च स्वर्गावगाहनरूपसमानधर्मः इववाचकशब्देन ज्ञायते इत्यतः पूर्णोपमालङ्कारः।

कुमारसम्भवद्वितीयसर्गाधारेण उपमालङ्कारलक्षणसमन्वयः :–

प्रस्तुतकुमारसम्भवमहाकाव्यस्थद्वितीयसर्गे स्थालीपुलाकन्यायेन उपमायाः परामर्शः क्रियते। तारकासुरेण बाधिताः म्लानमुखाः सर्वेऽपि देवाः ब्रह्मलोकम् अगच्छन्। तदा –

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव।। २।।

परिम्लानमुखश्रियां तेषां ब्रह्मा सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव आविः अभूत्।

अयं भावः :– तारकासुरस्य भयात् परिक्षीणमुखकान्तियुक्तानां तेषां देवानां पुरतः 'प्रातःकाले मुकुलितपद्मयुक्तानां तटकानां सम्मुखम् उदीयमानो सूर्यः यथा प्रत्यक्षो भवति' तथा ब्रह्मदेवः प्रत्यक्षोऽभूत्।

परिम्लानमुखश्रियां तेषाम् (देवानाम्) इति उपमेयम्। मुकुलितपद्मयुक्तानां सरसां (पुरतः) इति उपमानम्। **इव** उपमावाचकशब्दः। प्रत्यक्षत्वं समानधर्मः। अतः अत्र उपमालङ्कारः।

अपि च ब्रह्मा इन्द्रादिदेवान् इत्थं पृच्छति–

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा।
***हिमक्लिष्टप्रकाशानि ज्योतींषीव* मुखानि वः।। १९।।**

हे वत्साः ! ***हिमक्लिष्टप्रकाशानि ज्योतींषि इव*** वः मुखानि पुरा यथा आत्मीयां द्युतिं न बिभ्रति। इदं किम्?

अयं भावः :– हे वत्साः ! यथा नीहारेण नक्षत्रद्युतिः मलीना भवति तद्वत् युष्माकमपि मुखानि पूर्वमिव स्वाभाविककान्तिम् न धृत्वा, मलिनानि सञ्जातानि। अस्य कारणं किम् भवेत्।

अत्र च **हिमक्लिष्टप्रकाशानि ज्योतींषि** उपमानम्। **देवानां मुखानि** उपमेयम्। **पूर्वतनद्युतेरभावत्वं** समानधर्मः। इव च उपमावाचकः। अतः अत्र उपमालङ्कारः।

प्राधान्यात् इन्द्रस्यावस्थां प्रदर्शयति –

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्।
वृत्रस्य हन्तुः कुलिशं *कुण्ठिताश्रीव लक्ष्यते*।। २०।।

अर्चिषां प्रशमात् अनुद्गीर्णसुरायुधम् एतत् वृत्रस्य हन्तुः कुलिशं ***कुण्ठिताश्रि इव लक्ष्यते ?***

भावः :– इन्द्रस्य तेजसः नष्टकारणात् चित्र–विचित्रप्रभाभिः हीनत्वेन दृश्यमानम् एतत् इन्द्रस्य वज्रायुधम् **हतश्री इव** किमर्थं दृश्यते ?

इन्द्रस्य वज्रायुधम् उपमेयम्। **कुण्ठिताश्रीः** उपमानम्। **इव** उपमावाचकः। **तेजोहीनत्वं (कुण्ठितलक्ष्यत्वं)** समानधर्मः। अतः अत्र उपमालङ्कारः।

अथ वरुणदेवस्य दशां वर्णयति –

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।। २१।।

किञ्च अयम् अरिदुर्वारः प्रचेतसः पाणौ पाशः ***मन्त्रेण हतवीर्यस्य फणिनः दैन्यम् आश्रितः।***

भावः :– किन्तु पुरोदृश्यमानः शतॄणां संहारकः वरुणदेवस्य हस्तयोः अलङ्कृतः अयं पाशः गारुडमन्त्रेण तेजोविहीनं प्राप्य, सर्पवत् दैन्यत्वं गच्छति।

वरुणदेवस्य पाशः उपमेयम्। **गारुडमन्त्रसर्पः** उपमानम्। **इव** उपमावाचकः। **हतवीर्यता–तेजोहीनतावशात् दैन्यत्वाश्रयणं** समानधर्मः। अतः अत्र उपमालङ्कारः।

अथ कुबेरस्य दशां वर्णयति –

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुः *भग्नशाख इव द्रुमः।। २२।।*

अपविद्धगदः ***भग्नशाखः द्रुमः इव*** स्थितः कुबेरस्य बाहुः मनःशल्यं पराभवं शंसति इव।

भावः :– गदाविहीनस्य कुबेरस्य हस्तः कर्तितशाखाद्रुम इव मानसिकं क्षीणत्वं तस्य शत्रुकृतं पराभवं सूचयति।

गदाविहीनस्य **कुबेरस्य हस्तः** उपमेयम्। **कर्तितशाखाद्रुमः** उपमानम्। **इव** उपमावाचकः। **पराभवशंसनं** समानधर्मः। अतः अत्र उपमालङ्कारः।

यमराजस्य अवस्थामाह –

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।। २३।।

अस्तमितत्विषा दण्डेन यमः अपि भूमिं विलिखन् अमोघे अपि अस्मिन् निर्वाणालातलाघवं कुरुते।

भावः :– यमधर्मराजोऽपि अस्तमिततेजसा स्वदण्डेन पृथिव्याम् आलिखन् शान्तोल्मुक इव अस्य निष्क्रियता क्लैब्यं प्रकटयति।

अस्तमितदण्डकान्तियुक्तः **यमधर्मराजः** उपमेयम्। **निर्वाणालातलाघवम्** उपमानम्। **निक्रियता** समानधर्मः। अतः इयम् उपमा।

द्वादशानाम् आदित्यानाम् अवस्थामाह–

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्।। २४।।

प्रतापक्षतिशीतला अमी आदित्याः च कथं चित्रन्यस्ता इव प्रकामालोकनीयतां गताः?

भावः :– तेजसां क्षयेण अत्यन्तं शीतलाः सञ्जाताः एते द्वादश आदित्याः, चित्रलिखिताः आदित्याः इव नेत्रदर्शनं विदधाति केन हेतुना ?

प्रताप–क्षतिशीतलाः आदित्याः उपमेयम्। **चित्रन्यस्ताः आदित्याः** उपमानम्। **नेत्रदर्शनम्** समानधर्मः। **इव** उपमावाचकशब्दः। अतः उपमालङ्कारलक्षणसमन्वयः।

अथ इदानीं मरुताम् अवस्थामाह–

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते।
अम्भसामोघसंरोधः प्रतीपगमनादिव।। २५।।

मरुतां पर्याकुलत्वात् वेगभङ्गः अम्भसां प्रतीपगमनात् ओघसंरोधः इव अनुमीयते।

भावः :– एतेषां वायूनाम् वेगव्याकुलता कारणेन एवं भग्नत्वं दृश्यते यथा उच्चप्रदेशस्य अवरोधेन जलप्रवाहः स्थगितो भूत्वा, प्रतीपं प्रवहति तद्वत्।

अष्टौ मरुतः (वायवः) उपमेयम्। **अम्भांसि** उपमानम्। **वेगभङ्गत्वम्, ओघसंरोधत्वं** च समानधर्मः।

इव उपमावाचकशब्दः। अर्थावृत्तिदीपकालङ्कारः।

एवं मुखविकृत्यादीनां हेतुं स्वयमेवमाह –

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः।। २७।।

प्रथमं लब्धप्रतिष्ठा यूयं बलवत्तरैः परैः उत्सर्गाः अपवादैः इव किं कृतव्यावृत्तयः (भवथ)।

भावः :– लब्धावकाशानि **मा हिंस्यात् सर्वभूतानि** इत्येवमादीनि सामान्यशास्त्राणि, **अग्नीषोमीयं पशुमालभेत** इत्येवमादिभिः वैदिकापवादशास्त्रैः (निरवकाशैः विशेषशास्त्रैः) बाधितत्वात् सङ्कुचितमनस्काः इव भवन्तः देवाः उत्सर्गशास्त्रवत् प्रथमं लब्धप्रतिष्ठाः, तदनन्तरं प्रबलशत्रुभिः (अपवादशास्त्रैः) पीडितत्वात् – (भवन्तः) कृतप्रतिष्ठाभङ्गाः सञ्जाताः किम् इति। (तस्य प्रतिष्ठां त्यक्तवन्तो वा ?)

लब्धप्रतिष्ठाः देवाः प्रबलशत्रुणा तारकासुरेण बाधितत्वम् उपमेयम्। **सावकाशाः उत्सर्गाः निरवकाशैः अपवादैः कृतव्यावृत्तित्वम्** उपमानम्। **इव** उपमावाचकशब्दः। **कृतव्यावृत्तित्वं** समानधर्मः।

अथ स्वाधिकारोपप्लवहेतुभूतं तारकासुरं निर्दिशति –

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः।। ३२।।

हे भगवन्! भवल्लब्धवरोदीर्णः तारकाख्यः महासुरः धूमकेतुः इव लोकानाम् उपप्लवाय उत्थितः।

भावः :– हे भगवन् ! भवतः सकाशात् वरं लब्ध्वा महादानवः तारकासुरः उद्धतो भूत्वा सकललोकानां विनाशाय धूमकेतुनक्षत्र इवोत्पन्नः अस्ति।

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः उपमेयम्। **धूमकेतुः नक्षत्रः** उपमानम्। **लोकानां विनाशनं** समानधर्मः। **इव** उपमावाचकशब्दः। अतः अत्र उपमालङ्कारः।

अथ सूर्यस्य अनुवृत्तिमाह–

पुरे तावन्तमेवास्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते।। ३३।।

अस्य पुरे रविः तावन्तम् एव आतपं तनोति। यावन्मात्रेण दीर्घिकाकमलोन्मेषः साध्यते।

भावः :– सूर्यः तारकासुरनगरे यावन्मात्रेण आतपेन वापीपद्मविकासः भवति तावन्मात्रमल्प–परिमाणमेव आतपं प्रसारयति। तीक्ष्णकिरणोऽपि सूर्यः तस्य तारकासुरस्य भीत्या तत्पुरे मन्दोष्णः सन्

प्रकाशते।

अथ षण्णाम् ऋतूनाम् अनुवृत्तिमाह–

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते।। ३६।।

ऋतवः पर्यायसेवाम् उत्सृज्य पुष्पसम्भारतत्पराः सन्तः उद्यानपालसामान्यम्, तम् उपासते।

भावः :– शीतलं उष्णादिकं च स्वं स्वं गुणं (धर्मं) परित्यज्य उद्यानपालकवत् सुमनसां सम्पादनतत्पराः वसन्तादयः षड्तवः अन्यतमस्य ऋतोः पुष्पं न नाशयन्ति। अर्थात् एकदैव ते ऋतवः तारकासुरम् आराधयन्ति इति भावः।

किं बहुना सुरपतेरश्वरत्नमपि तेनापहृतम् –

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः।। ४७।।

च तेन उच्चैः उच्चैःश्रवाः हयरत्नम्, देहबद्धं चिरकालार्जितम् इन्द्रस्य यश इव अहारि।

भावः :–किञ्च स तारकासुरः इन्द्रस्य बहुकालसञ्चितं मूर्तिमत् यशः इव प्रोन्नतम् उच्चैःश्रवः अभिधेयं घोटकरत्नम् अपहृतवान्।

तर्हि सामाद्युपायाः कथं न प्रयुक्ताः इत्यत्राह –

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके।। ४८।।

क्रूरे तस्मिन् नः सर्वे उपायाः सान्निपातिके विकारे वीर्यवन्ति औषधानि इव प्रतिहतक्रियाः भवन्ति।

भावः :– सन्निपातदोषजन्ये ज्वरादौ महावीर्याणि भेषजानि इव अस्माकं देवानां सर्वे सामादयः उपायाः क्रूरे तस्मिन् तारकासुरे निष्फला भवन्ति।

तत्र जयाशायाः वैफल्यम् आह–

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्।। ४९।।

यत्र अस्माकं जयाशा प्रतिघातोत्थितार्चिषा तेन हरिचक्रेण च अस्य कण्ठे निष्कम् इव अर्पितम्।

भावः :– यस्मिन् सुदर्शनचक्रे अस्माकं देवानां **नूनं वयमनेन जेष्यामः** इति विजयाशा आसीत्,

शिलातलसमकर्कशे तारकासुरकण्ठे प्रक्षिप्तेन तेन विष्णोः सुदर्शनचक्रेण तत्कण्ठकाठिन्यान्निर्गतया अनलज्वालयाऽस्य ग्रीवायां कण्ठभूषणमर्पितम् इव।

अथ सेनानीसृष्टेः प्रयोजनमाह–

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम्।। ५२।।

सुरसैन्यानां गोप्तारं यं पुरस्कृत्य गोत्रभित् जयश्रियं बन्दीम् इव शत्रुभ्यः प्रत्यानेष्यति।

भावः :– हे प्रभो! यादृशेन सेनापतिना देवराजः पूर्णां शक्तिं सम्पाद्य दुर्जयो भूत्वा स्वयमेव बन्दीभूताम् इव वैरिवशवर्तिनीं देवलक्ष्मीं प्रत्यानेतुं शक्तो भवेत्, तादृशः सेनापतिः त्वया स्रष्टव्य इति।

ब्रह्मस्वांशेनानवतरणे कारणमाह –

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।। ५५।।

इतः प्राप्तश्रीः सः दैत्यः इत एव क्षयं न अर्हति, विषवृक्षः अपि संवर्ध्य स्वयं छेत्तुम् (इष्यते तत्) असाम्प्रतम्।

भावः :– यथा स्वयं संवर्धितस्य विषवृक्षस्य अपि छेदनम् अनुचितं वर्तते, तथैव मया दत्तवरदानेन वर्धितस्य तारकासुरस्य नाशः मयैव न कर्तव्यः।

सम्प्रति तदंशोत्पत्तावुपायं दर्शयति –

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। ५९।।

ते यूयं संयमस्तिमितं शम्भोः मनः उमारूपेण अयस्कान्तेन लोहवत् आक्रष्टुं यतध्वम्।

भावः :– योग्यतमसेनापतेः उत्पत्त्या तारकासुरस्य वधाय सम्प्रार्थ्यमानाः हे देवाः यूयम् यथा अयस्कान्तमणिः लोहाकर्षकं भवति तद्वत् पार्वतीसौन्दर्यमणिना राग–द्वेषरहितस्य निर्गुणेशस्य हृदयम् आक्रष्टुं यत्नो विधीयन्ताम्।

अनेन कालिदासस्य उपमालङ्कारप्रयोगे महती प्रीतिरस्तीति स्पष्टुं ज्ञायते।

सन्दर्भवाक्यानि

१. वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवानां ब्रह्मणः स्तुतिसन्दर्भे कालिदासेन प्रोक्तः अयं च श्लोकभागः विद्यते। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

अथ सर्वस्य धातारं ते सर्वे सर्वतो मुखम्।
वागीशं वाग्भिरर्थ्याभिः प्रणीपत्योपतस्थिरे।। ३।। इति।

अस्यायं भावः :– ब्रह्मदेवस्य प्रकटानानन्तरम् ते सर्वे देवाः सर्वतो मुखम् (चतुर्मुखम्), वागीशम् (वाणीपतिम्) सर्वस्य धातारं तं ब्रह्मदेवं प्रणामपूर्वकम् अर्थयुक्तवचसा एवं तुष्टुवुः।

२. गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– अथ इन्द्रादिदेवैः द्वादशभिः श्लोकैः कृतं ब्रह्मणः स्तुतिप्रकारं प्रपञ्चयन् तत्राादौ तस्य त्रिमूर्तिसृष्टौ कारणत्वकथनसन्दर्भे अस्ति अयं श्लोकभागः। तस्य श्लोकभागस्य अयं सम्पूर्णश्लोकः–

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे।। ४।। इति।

अस्यायं भावः :– हे भगवन्! एतस्मात् जगत्सृष्टेः प्राक् त्वं केवलात्मा आसीत्। अतः केवलात्मने तुभ्यं नमः। तस्मात् अनन्तरं सृष्टिप्रवृत्तिकाले सत्त्व–रजः–तमोरूपगुणविभागाय उपाधिभेदं प्राप्तवते ब्रह्म–विष्णु–रुद्ररूपत्रिमूर्तिस्वरूपाय तुभ्यं नमः।

३. प्राकाम्यं ते विभूतिषु।

कविपरिचयः :– अयं श्लोकभागः **महाकवेः कालिदासस्य कुमारसम्भवमहाकाव्यद्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणः अणिमादिसिद्धिषु स्वाधीनत्वम् अस्ति इति इन्द्रादिदेवैः कृतस्तवनसन्दर्भे अस्ति अयं श्लोकभागः। तस्य श्लोकभागस्य अयं सम्पूर्णश्लोकः–

द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूषितम्।। ११।।

अस्यायं भावः :– हे भगवन्! त्वं सरित्समुद्रादिवत् द्रवः (रसात्मकः) असि, पृथवी–पर्वतादिवत् कठिनः असि। घटादिपदार्थवत् इन्द्रियग्राह्यः स्थूलरूपः असि, परमाण्वादिवत् अतीन्द्रियः चासि। कार्पासादिवत् लघुः तथा पर्वतादिवत् भवान् अचलोऽपि विद्यते। भवान् घटादिवत् कार्यरूपेण व्यक्तः तथा कार्याणां कारणरूपत्वेन अव्यक्तोऽपि वर्तते। एवम् अणिमाद्यष्टसिद्धिषु भवतः यथेष्टं प्राकाम्यं भवति। अतः सर्वं त्वमेव असि।। ११।।

४. तासां त्वं प्रभवो गिराम्।

कविपरिचयः :– अयं श्लोकभागः **महाकवेः कालिदासस्य कुमारसम्भवमहाकाव्यद्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः वेदानाम् उत्पत्तिः ब्रह्मणः एव इति विरिञ्चिस्तुतिसन्दर्भे कालिदासेन उक्तः अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्।। १२।। इति।

अयं भावः :– हे भगवन्! यस्याः वेदरूपवाण्याः उद्घातः (आरम्भः) प्रणवः (ॐकारः) अस्ति तथैव यस्याः वाण्याः उच्चारणम् उदात्त–अनुदात्त–स्वरितरूपैः त्रिभिः स्वरैः उच्चरितो भवति, यया वाण्या ज्योतिष्टोमादियज्ञानां निर्वहणं भवति, अपि च येषां यज्ञानां फलं स्वर्गदिः अस्ति तास्याः वेदवाण्याः भवान् प्रभवस्थानम् (मूलकारणम्) विद्यते।। १२।।

५. प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मणः प्रतिवचने वैशिष्ट्यकथनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।। १७।।

भावः :– शब्दानां प्रवृत्तिः चतुर्धा भवति। तद्यथा – द्रव्य–जाति–गुण–क्रियाः अथवा परा, पश्यन्ती, मध्यमा, वैखरी इति चत्वारः प्रकाराः शब्दानां प्रवृत्तिः तदा पुराणपुरुषस्य ब्रह्मदेवस्य चतुर्भिः मुखैः निर्गमनात् ब्रह्मणः चतुर्मुखत्वम् चरितार्थम् अभूत्।। १७।।

६. हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने देवानां कान्तिहीनतायाः कारणं प्रश्नविधानसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः।। १९।।

भावः :– हे वत्साः ! यथा नीहारेण नक्षत्रद्युतिः मलीना भवति तद्वत् युष्माकमपि मुखानि पूर्वमिव स्वाभाविककान्तिम् न धृत्वा, मलिनानि सञ्जातानि। अस्य कारणं किम् भवेत्।

७. कुण्ठिताश्रीव लक्ष्यते।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने **इन्द्रस्य** अवस्थावर्णनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते।। २०।।

भावः :– इन्द्रस्य तेजसः नष्टकारणात् चित्र–विचित्रप्रभाभिः हीनत्वेन दृश्यमानम् एतत् इन्द्रस्य वज्रायुधम् हतश्री इव किमर्थं दृश्यते ?

८. मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने **वरुणदेवस्य** अवस्थावर्णनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।। २१।।

भावः :– किन्तु पुरोदृश्यमानः शतॄणां संहारकः वरुणदेवस्य हस्तयोः अलङ्कृतः अयं पाशः गारुडमन्त्रेण तेजोविहीनं प्राप्य, सर्पवत् दैन्यत्वं गच्छति।

९. भग्नशाख इव द्रुवः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने **कुबेरस्य** अवस्थावर्णनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः।। २२।।

भावः :– गदाविहीनस्य कुबेरस्य हस्तः कर्तितशाखाद्रुम इव मानसिकं क्षीणत्वं तस्य शत्रुकृतं पराभवं सूचयति।

१०. कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने **यमराजस्य** अवस्थावर्णनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।। २३।।

भावः :– यमधर्मराजोऽपि अस्तमिततेजसा स्वदण्डेन पृथिव्यां आलिखन् शान्तोल्मुक इव अस्य निष्क्रियता क्लैब्यं प्रकटयति।

११. चित्रन्यस्ता इव गताः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– इन्द्रादिदेवैः कृतब्रह्मणः स्तुत्यनन्तरं ब्रह्मा स्वप्रतिवचने **द्वादशानाम् आदित्यानाम्** अवस्थावर्णनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्।। २४।।

भावः :– तेजसां क्षयेण अत्यन्तं शीतलाः सञ्जाताः एते द्वादश आदित्याः, चित्रलिखिताः आदित्याः इव नेत्रदर्शनं विदधाति केन हेतुना ?

१२. धूमकेतुरिवोत्थितः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणा इन्द्रादिदेवानाम् अवस्थावर्णनन्तरं बृहस्पतेः प्रतिवचने **स्वाधिकारोपप्लवहेतुभूतस्य तारकासुरस्य** सूचनसन्दर्भे विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः।। ३२।।

भावः :– हे भगवन् ! भवतः सकाशात् वरं लब्ध्वा महादानवः तारकासुरः उद्धतो भूत्वा सकललोकानां विनाशाय धूमकेतुनक्षत्र इवोत्पन्नः अस्ति।

१३. नादत्ते केवलां लेखां हरचूडामणीकृताम्।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणा इन्द्रादिदेवानामवस्थावर्णनन्तरं बृहस्पतेः प्रतिवचने **चन्द्रस्य तारकासुरसेवा–प्रकारवर्णनसन्दर्भे** विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादस्ते केवलां लेखां हरचूडामणीकृताम्।। ३४।।

भावः :– चन्द्रमाः कृष्णपक्षेऽपि षोडशभिः परिपूर्णः सन् तारकासुरं सेवते केवलां शङ्करशिरसि वर्तमानां कलां न स्वीकरोति।

१४. तालवृन्तानिलाधिकम्।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणा इन्द्रादिदेवानामवस्थावर्णनन्तरं बृहस्पतेः प्रतिवचने **वायोः तारकासुरसेवा–प्रकारवर्णनसन्दर्भे** विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात्।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्।। ३५।।

भावः :– वायुदेवः तारकासुरस्य उद्याने अकारणतया यस्य कस्यापि पुष्पस्य पातः न भवेत् इत्यतः तारकासुरेण भयसन्त्रस्तः सन् तस्य समीपे व्यजनपवनात् अधिकं वायुः न वाति।

१५. उद्यानपालसामान्यमृतवस्तमुपासते।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणा इन्द्रादिदेवानामवस्थावर्णनन्तरं बृहस्पतेः प्रतिवचने **षण्णाम् ऋतूनां तारकासुरसेवाप्रकारवर्णनसन्दर्भे** विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते।। ३६।।

भावः :– शीतलम् उष्णादिकं च स्वं स्वं गुणं (धर्मं) परित्यज्य उद्यानपालकवत् सुमनसां सम्पानतत्पराः वसन्तादयः षड्तवः अन्यतमस्य ऋतोः पुष्पं न नाशयन्ति। अर्थात् एकदैव ते ऋतवः तारकासुरम् आराधयन्ति इति भावः।

१६. शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– ब्रह्मणा इन्द्रादिदेवानामवस्थावर्णनन्तरं बृहस्पतेः प्रतिवचने **सर्वदेवानुवृत्तावपि चराचरविजयिनि तारकासुरे देवैः कृतसेवावैफल्यवर्णनसन्दर्भे** विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः।। ४०।।

भावः :– उक्तप्रकारेण सूर्य–शशि–महद्–उदधि–नाग–महेन्द्रैः निरन्तरमाराध्यमानोऽपि स तारकासुरः त्रिलोकं पीडयति। यतो हि दुर्जनः प्रत्यपकारेणैव शान्तो भवेत् न तु प्रत्युपकारेण। प्रत्युपकारेण गर्वितो भवति।

१७. वीर्यवन्त्यौषधानीव विकारे सान्निपातके।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– बृहस्पतेः प्रतिवचनानन्तरं ब्रह्मणा तर्हि सामाद्युपायाः कथं न प्रयुक्ताः इति प्रश्ने कृते देवैः समाधान**सन्दर्भे** विद्यते अयं श्लोकभागः। अस्य पूर्णः श्लोकस्तु इत्थं वर्तते –

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके।। ४८।।

भावः :– सन्निपातदोषजन्ये ज्वरादौ महावीर्याणि भेषजानि इव अस्माकं देवानां सर्वे सामादयः उपायाः क्रूरे तस्मिन् तारकासुरे निष्फला भवन्ति।

१८. कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– अथ तारकासुरसंहाराय देवसेनानीसृष्ट्यर्थं ब्रह्माणः प्रार्थनासन्दर्भे देवनाम् इयम् उक्तिः –

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।। ५१।।

भावः :– हे स्वामिन्! (जगत्स्रष्टः!) यथा मुमुक्षवः जगतो निवृत्तये निवृत्तिलक्षणं धर्मं वाञ्छन्ति तथैव वयं तारकासुरस्य विनाशाय देवानां सेनायाः नायकं निर्मातुम् इच्छामः।

१९. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– अथ तारकासुरसंहाराय देवसेनानीं प्रार्थयमानानां देवानां **वचनस्य प्रतिवचनसन्दर्भे** ब्रह्मणः इयम् उक्तिः –

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।। ५५।।

अस्यायं भावः :– मया (ब्रह्मणा) दत्तवरस्य तारकासुरस्य मयैव हननमनुचितम्। यतो हि केनचित् स्वयं संवर्धितस्य विषवृक्षस्य अपि छेदनम् यथा अनुचितं वर्तते, तथैव मया दत्तवरदानेन वर्धितस्य तारकासुरस्य नाशः मयैव न कर्तव्यः।

२०. शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।

कविपरिचयः :– अयं श्लोकभागः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– तारकासुरसंहाराय देवसेनानीसृष्ट्यर्थं देवनां प्रार्थनानन्तरं ब्रह्मणः उपायसूचनासन्दर्भे इयम् उक्तिः –

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। ५९।।

भावः :– योग्यतमसेनापतेः उत्पत्त्या तारकासुरस्य वधाय सम्प्रार्थ्यमानाः हे देवाः यूयम् यथा अयस्कान्तमणिः लोहाकर्षकं भवति तद्वत् पार्वतीसौन्दर्यमणिना राग–द्वेषरहितस्य निर्गुणेशस्य हृदयम् आक्रष्टुं यत्नो विधीयन्ताम्।

२१. सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम।

कविपरिचयः :– अयं श्लोकभोगः **महाकविना कालिदासेन** विरचितस्य **कुमारसम्भवमहाकाव्यस्य द्वितीयसर्गे** विद्यते।

सन्दर्भः :– तारकासुरसंहाराय देवसेनानीसृष्ट्यर्थं देवनां प्रार्थनानन्तरं तस्यासुरस्य संहाराय गत्यन्तरम् अस्तीति कथनसन्दर्भे ब्रह्मणः इयम् उक्तिः –

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम्।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम।। ६०।।

भावः :– उभाभ्याम् आवाभ्यां शिव–ब्रह्मभ्याम् आहितम् वीर्यम् वोढुं सा पार्वती, मे च तदीया जलमयी मूर्तिः इत्युभे एव नार्यौ समर्थे स्तः। नान्याः काश्चन स्त्रियः समर्थाः – इति।

कुमारसम्भवम्

ऐच्छिकप्रश्नाः समाधानानि च

१. दिवौकसः केन विप्रकृताः ? **तारकेण**

२. देवगणाः कं पुरोधाय स्वायंभुवं धाम ययुः ? **तुरासाहम्**

३. परिम्लानमुखश्रियां देवानां पुरतः ब्रह्मा कथमाविर्बभूव ? **सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव।**

४. देवाः कैः प्रणिपत्य उपतस्थिरे ? **वाग्भिरर्थ्याभिः**

५. ब्रह्मणा अपामन्तः किमुप्तम् ? **अमोघं बीजम्**

६. ब्रह्मणः कति अवस्थाभिः महिमा उदीरिता ? **तिसृभिः**

७. ब्रह्मणः स्वप्नावबोधौ भूतानां कौ ? **प्रलयोदयौ।**

८. कः जगदन्तः निरन्तकः चासीत् ? **ब्रह्मा**

९. ब्रह्मणः प्राकम्यं कुत्र वर्तते ? **अष्टविभूतिषु।**

१०. केषाम् उद्घातः प्रणवः अस्ति ? **वेदमन्त्राणाम्**

११. वेदमन्त्राणाम् उच्चारणं कतिभिः न्यायैः उदीरितं भवति ? **त्रिभिः** (उदात्त-अनुदात्त-स्वरितसंज्ञैः)

१२. वेदमन्त्राणां कर्म किम् ? **यज्ञः**

१३. वेदमन्त्राणां (कर्मणः) फलं किम् ? **स्वर्गप्राप्तिः**

१४. प्रकृतिपुरुषयोर्मध्ये कः/का उदासीनः/ उदासीना ? **पुरुषः**

१५. ब्रह्मा वेधसां किम् उच्यते ? **विधाता।**

१६. शब्दानां प्रवृत्तिः कतिधा ? **चतुर्धा** (परा-पश्यन्ती-मध्यमा-वैखर्यः अथवा जाति-द्रव्य-गुण-क्रिया)

१७. देवगणानां मुखानि कथमासन् इति ब्रह्मा उक्तवान् ? **हिमक्लिष्टप्रकाशानि ज्योतींषीव।**

१८. इन्द्रस्य आयुधं किम् ? **वज्रम्।**

१९. वज्रेण कः असुरः हतः ? **वृत्रासुरः।**

२०. इन्द्रस्य कुलिशं कथमासीत् इति ब्रह्मा उक्तवान् ? **कुण्ठितश्री इव।**

२१. मन्त्रेण हतवीर्यस्य फणिनः दैन्यं कः आश्रितः ? **वरुणस्य पाशः।**

२२. गदा कस्य आयुधम् ? **कुबेरस्य।**

२३. अपविद्धगदः कः ? **कुबेरस्य बाहुः।**

२४. कस्य मनः शल्यं पराभवं शंसतीव आसीत् ? **कुबेरस्य।**

२५. दण्डः कस्यायुधम् ? **यमस्य।**

२६. चित्रन्यस्ताः इव के आसन् ? **द्वादशादित्याः।**

२७. केषां वेगभङ्गः अनुमीयते ? **मरुताम्।**

२८. क्षतहुङ्कारशंसिनः के ? **रुद्राणां मूर्धानः।**

२९. वासवः कं नेत्रसहस्रेण नोदयामास ? **बृहस्पतिम्।**

३०. तारकासुरः लोकानाम् उपप्लवाय कथमुत्थितः ? **धूमकेतुरिव।**

३१. रविः तारकासुरस्य पुरे कियन्मात्रेण आतपं तनोति ?

यावन्मात्रेण दीर्घिकाकमलोन्मेषः साध्यते तावन्मात्रेण।

३२. तारकासुरसेवायां चन्द्रः कां कलां नादत्ते ? **हरचूडामणिकृताम्।**

३३. तारकासुरस्य उद्याने वायुः क्षिप्रं किमर्थं न वाति ? **कुसुमस्तेयसाध्वसात्।**

३४. तारकासुरस्य उद्याने वायुः कथं प्रवहति ? **तालवृन्तानिलवत्।**

३५. तारकासुरम् ऋतवः कथमुपासते ? **पर्यायसेवामुत्सृज्य एककालेनागम्य।**

३६. सरितां पतिः तारकासुरभीत्या किं करोति ?

तारकासुरस्य कृते उपायनयोग्यानां रत्नानामानिष्पत्तेः प्रतीक्षते।

३७. स्थिरप्रदीपतामेत्य के तारकासुरं सेवन्ते ? **वासुकिप्रमुखाः भुजङ्गाः।**

३८. इन्द्रः कैः तारकासुरमनुकूलयति ? **कल्पद्रुमविभूषणैः।**

३९. दुर्जनः कथं शाम्येत् ? **अपकारेणैव नोपकारेण।**

४०. तारकासुरः कैः वीज्यते ? सुरवन्दीनां श्वाससाधारणानिलैः वाष्पसीकरवर्षिभिः चामरैः।

४१. तारकासुरेण कानि आक्रीडपर्वताः कल्पिताः ? **मेरुशृङ्गाणि।**

४२. मन्दाकिन्याः पयः कुत्र वर्तते इति बृहस्पतिः ब्रह्माणं वदति ? **तारकासुरस्य वाप्यम्।**

४३. तारकासुरेण पीडितैः देवैः (स्वर्गिभिः) किं नानुभूयते ? **भुवनालोकनप्रीतिः।**

४४. देवानां सर्वेऽपि उपायाः कथमुपहतक्रियाः जाताः ? **सन्निपातके विकारे वीर्यवन्त्यौषधानीव।**

४५. हरिचक्रं कथं तारकेण स्वीकृतम् ? **कण्ठे निष्कमिव।**

४६. कर्मबन्धच्छेदनार्थं मुमुक्षवः कं स्रष्टुमिच्छन्ति ? **धर्मम्।**

४७. केन दृष्टान्तेन ब्रह्मा स्वयं तारकासुरवधाय असमर्थ इति उक्तवान् ?

विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।

४८. तमःपारे व्यवस्थितं ज्योतिः कः ? **शिवः।**

४९. अयस्कान्तेन लोहवत् कया कस्य मनः आक्रष्टुं ब्रह्मा आदिष्टवान् ? **उमया शिवस्य मनः।**

५०. शिवस्य वीर्यं सोढुं का समर्था ? **पार्वती।**

५१. ब्रह्मणः वीर्यं सोढुं का समर्था ? **शिवस्य जलमयमूर्तिः।**

५२. तारकासुरस्य संहारं कः करिष्यति इति ब्रह्मा उक्तवान् ? **शिवस्य पुत्रः।**

५३. ब्रह्मणः वचनं श्रुत्वा वासवः कमाहूतवान् ? **कामदेवम्।**

५४. चूताङ्कुरास्त्रं कस्य वर्तते ? **कन्दर्पस्य।**

५५. पुष्पधन्वा इति कः ? **कन्दर्पः।**

५६. कुमारसम्भवं कीदृशं काव्यम् ? **महाकाव्यम्।**

५७. कुमारसम्भवस्य रचयिता कः ? **कालिदासः।**

५८. कुमारसम्भवस्य नायकः कः ? **शिवः।**

५९. कुमारसम्भवस्य नायिका का ? **पार्वती।**

६०. कुमारसम्भवे कति सर्गाः सन्ति ? **१७ (सप्तदश)।**

पञ्चाङ्कप्रश्नाः – सन्दर्भपुरस्सरं व्याख्यात।

१. वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे।

२. गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे।

३. प्राकाम्यं ते विभूतिषु।

४. तासां त्वं प्रभवो गिराम्।

५. प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।
६. हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः।
७. कुण्ठिताश्रीव लक्ष्यते।
८. मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।
९. भग्नशाख इव द्रुवः।
१०. कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।
११. चित्रन्यस्ता इव गताः।
१२. धूमकेतुरिवोत्थितः।
१३. नादत्ते केवलां लेखां हरचूडामणीकृताम्।
१४. तालवृन्तानिलाधिकम्।
१५. उद्यानपालसामान्यमृतवस्तमुपासते।
१६. शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।
१७. वीर्यवन्त्यौषधानीव विकारे सान्निपातके।
१८. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।
१९. शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।
२०. सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम।

दशाङ्कप्रश्नाः

१. कुमारसम्भवम् इति महाकाव्यस्य कवि(कर्तृ)परिचयं विशदयत।
२. कुमारसम्भवमहाकाव्यस्य परिचयं प्रदाय तस्य महाकाव्यत्वं साधयत।
३. कुमारसम्भवस्य कथासारं लिखत।
४. कुमारसम्भवस्य द्वितीयसर्गवैशिष्ट्यं प्रतिपादयत।
५. कुमारसम्भवस्य द्वितीयसर्गकथावस्तु विशदयत।
६. देवगणैः ब्रह्मणः स्तुतिः कथमासीत् ? लिखत।
७. कालिदासप्रतिपादनानुसारं तारकासुरस्य उपप्लवं लिखत।
८. तारकासुरस्य भयेन पीडिताः देवाः तं कथं सेवितवन्तः ? यथाग्रन्थं विशदयत।
९. ब्रह्मणा देवनां दशा कथं प्रतिपादिता ? यथाग्रन्थं लिखत।
१०. तारकासुरस्य वधोपायः ब्रह्मणा कथं प्रतिपादितः ? लिखत।

प्रबन्धाः

१. दूरदर्शनम्
२. क्रेकिटाख्यक्रीडा
३. पर्यावरणम्
४. जनसंख्या
५. धर्मो रक्षति रक्षितः
६. संस्कृतम् संस्कृतेर्मूलम्
७. आचारः परमो धर्मः
८. परोपकारः
९. वसुधैव कुटुम्बकम्

१०. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

११. योगः कर्मसु कौशलम्।

१२. विद्याधनं सर्वधनप्रधानम्।

१३. श्रीवेङ्कटेश्वरदेवालयः

१४. दैनिकजीवनम्।

१५. अस्माकं प्रियविश्वविद्यालयः।

आधारग्रन्थाः

१. कुमारसम्भवं महाकाव्यम् (सम्पूर्णम्) – सञ्जीविनी संस्कृत-सरलाहिन्दीव्याख्यया विभूषितम्। सम्पादकः – व्याख्याकारश्च – डा. सुधाकरमालवीयः। **प्रकाशकः** – कृष्णदास अकादमी, पो०बा०नं० ११९८, के० ३७/११८, गोपाल मन्दिर लेन, वाराणसी – २२१००१ (भारत) फोन : ३३५०२०. १९९७.

२. कुमारसम्भवम् – महाकविकालिदासः, विमला व्याख्या – श्रीमुखशाण्डित्यगोत्रोत्पन्न-त्रिपाठ्युपाह्व पं. श्रीकृष्णमणिशास्त्रिकृता।

३. श्रीमहाकविकालिदासप्रणीतम् **कुमारसम्भवम्** मल्लिनाथकृतसञ्जीविनीसमेतम्। चेन्नपुरी वाविल्ल.रामस्वामिशास्त्रुलु अण्ड् सन्स् इत्येतैः श्रीराममुद्रणालये मुद्रितं प्रकटितं च। १९३०।

४. तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठीयपुस्तकानि च।